॥ ऐडँशुद्धाशुद्धीयम् ॥

(३५०।२)
एतोन्विन्द्र२स्तवा६मा॥ शुद्ध२शुद्धे। न। साम्ना२॥ शुद्धाइरू२वथा३इः।
वावा२र्ध्वा२३४२साम्॥ शुद्धरा२३शी॥ वीन्समतु। इडा२३भा३४३। औ२३४५इ॥डा॥

(स्व० ४। प० ११। वि० ५)८(तु। ६०१)

॥ रयिष्ठे द्वे। द्वयोः गोतमोऽनुष्टुबिन्द्रः ॥

(३५१।१)
योरयिवोरयाहाउ॥ ता२३४माः। योद्युम्नैर्द्युम्नवत्तमः। सोमःसुतःसआ२३होइ।
द्रता३इ॥ अस्तिस्वधापता२३होयेर॥ मदो२३४५इ॥ डा॥

(स्व० ७। प० ८। वि० ७)९(जे। ६०२)

(३५१।२)
यारायिवोरयि। तमो२३४हाइ॥ योद्युम्नैर्द्युम्नव। तमा२३४हाइ॥ सोमःसुतःसइ।
द्रतो२३४हाइ॥ अस्तिस्वधापते। मदो२३४हा। हो५इ॥डा॥

(स्व० ७। प० १०। वि० ५)१०(ञु। ६०३)

अष्टाविंशति प्रथमः, द्वादशः खण्डः ॥ १२ ॥ दशतिः ॥ ६ ॥

इति तृतीयोऽध्यायः ॥ ३ ॥

॥ कौलमबर्हिषे द्वे। द्वयोः कुलमबर्हिरनुष्टुबिन्द्रः ॥

(३५२।१)
प्रत्यस्मैपिपाहाउ॥ आइषा३ताइ। वाइश्वानिवाइ। दुषे३हा३इ। भा३रा।
आरा२०गमा॥ याज्ञा३हा३। ग्मा३याइ॥ अपा२३। श्चा२दा२३४औहोवा।
घ्नने२नरा२३४५ः॥

(स्व० ७। प० ११। वि० ९)११(चो। ६०४)

(३५२।२)
प्रत्यस्मैपीदपीपताइ॥ वाइश्वानिवाइ। दूषभारा२। आरा२०गमा। यज्ग्मा।
याइ॥ अपश्चादध्वना२३होइ॥ नरा। औ३होवा। हो५इ॥ डा॥

(स्व० ६। प० ११। वि० ६) १२(कृ। ६०५)

(३५२।३)
॥ नानदम्। इन्द्रोऽनुष्टुबिन्द्रः ॥

प्रत्यस्मैपिपी। पता३इ। वा२३४३। श्वानिविदुषे। भारा॥ अरंगमायज।
ग्मयो२४हाइ॥ आपश्चादा॥ घ्नेनो२३४वा। ना५रो६हाइ॥

(स्व० ५। प० १०। वि० ४)१३(मी। ६०६)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(३५३।१) ॥ शाकपूतम् । शाकपूतिरनुष्टुबिन्द्रः ॥

आनोवयोवयःशा६याम्॥ महान्तंगह्वरा२३४इष्ठाम् । महान्तंपूर्विना२३४इष्ठाम् ॥

उग्रंवा२३चाः॥ अपा३वा२धा६५६इः ॥ (स्व० ६ । प० ५ । वि० ८)१४(ङै । ३०७)

(३५४।१) ॥ कौलमलबर्हिषे द्वे । द्वयोः कुलमलबर्हिरनुष्टुबिन्द्रः ॥

आत्वारथंयथौहोवा॥ तायाइमू२३४न्ना । यवर्त्तयामसितुविकूर्मीम् । आ२३४र्ती ।

षहम्॥ आइन्द्रा२१शावी॥ ष्ठसत्पा२३ती३४३म्॥ ओ२३४५इ॥ डा ॥

(स्व० ४ । प० ९ । वि० ६)१५ (धू । ३०८)

(३५४।२)

आत्वारथंयथा । तयाइ । आत्वारथाम्॥ यथोतायाा । औहो२३४वा । ई२३४हा ।

सुम्नायवर्त्त३यामासि । औहो३१इ । औ२हो२३४वा॥ तुविकूर्मिमृ३ताइषहम् ।

औहो३१इ । औ२हो२३४वा॥ इन्द्र२शविष्ठ३सात्पतिम् । औहो३१इ ।

औ२हो२३४५वा६५६ ॥ ई२३४हा ॥ (स्व० ११ । प० १६ । वि० ८)१६ (कै । ३०९)

(३५५।१) ॥ मधुश्च्युन्निधनम् । प्रजापतिरनुष्टुबिन्द्रः ॥

सपूर्व्यामहोना६मे । वेनःक्रतु३भाइरानजे३ । हा३हा । औ३हो३वा ।

आइही२ । यस्यद्वारा३मानुःपिता३ । हा३हा । औ३हो३वा । आइही२ ।

दाइवेषुधा३ । हा३हाइ । औ३हो३वा । आइही२॥ यआ२३ ।

नार२जा२३४औहोवा॥ मधुश्चुता२३४५ः॥ (स्व० १० । प० १६ । वि० ९) १७(पो । ३१०)

(३५६।१) ॥ उपसस्साम । उपानुष्टुबिन्द्रः मरुतो वा ॥

यदीवहन्त्याशवः । य । द्येमादी॥ ओइवहन्ताआ१शावा२ः । ओइभ्राजमानारथाइपू१त्रा२ ।

ओइपिबन्तोमदिरांमा१धू२ ॥ ओइ । तत्रश्रवा२शसिकोवा३ओ२३४वा ॥

(स्व० ७ । प० ९ । वि० १०)१८(ह्रौ । ३११)

ण्वा५तो६हाइ ॥

(३५७।१) ॥ भारद्वाजम् । भरद्वाजोऽनुष्टुबिन्द्रः ॥

त्यमुवोअ । प्रहा । हा२३४णाम्॥ गृणीषेशवसः । पताइम् । आइन्द्रा२०वाइश्वा ।

सहा३१हाये२४ । नरामो२३॥ शचिष्ठा२३४०यी॥ श्वा३हो२३४ । श्वा ।

(त्री० ३ । प० १२ । वि० ९) १९ (ओ । ३१२)

दा५सो६हाइ ॥

CC-0. Shri Vipin Kumar Col. De...

॥ (दधिक्रम्) दधिक्राव्णम् । अग्निरनुष्टुविन्द्रः दधिक्रा वा ॥

(३५८।१)
औहाइ । दधिक्राव्णोअकारिषम् । औहाइ ॥ औहाइ । जिष्णोरश्वस्यवाजिनार३होइ ।
सुरभिनोमुखाकार२३रात् ॥ प्रनार२३होइ । आयू२३हो ॥ पितारा२३इपा३४३त् ।
औ२३४५इ ॥ डा ॥ (स्व० ९ । प० ११ । वि० ११) २० (त । ६१३)

॥ मारुतम् । मरुतोऽनुष्टुविन्द्रः ॥

(३५९।१)
पुरांभिन्दुर्युवाकवीः ॥ अमितौजाअजाया२३ता । आइन्द्रोविश्वा३ । स्याकर्मा२३४णाः ॥
धर्त्ता । वाज्रीवाओ२३४वा ॥ पुरू५ष्टुताः । हो४इ ॥ डा ॥
(स्व० ६ । प० ९ । वि० ७) २१ (घे । ६१४)

॥ एकादश द्वितीयः, प्रथमः खण्डः ॥ १ ॥ दशतिः ॥ ७ ॥

॥ वामदेव्यम् । वामदेवोऽनुष्टुविन्द्रः ॥

(३६०।१)
प्रप्रवस्त्रिष्टुभमिषमोहाओहा६ए ॥ वन्दद्वीरा । यआइन्दवे२ ॥ ओ३हा ।
ओ३हा३ए । धियावोमेधसा१ता३याइ । ओ३हा । ओ३हा३ए ॥
पुरांधी३या३ ॥ विवो२३४वा । सा५तो६हाइ ॥
(स्व० ६ । प० ११ । वि० ८) २२ (कै । ६१५)

॥ काश्यपम् । कश्यपोऽनुष्टुविन्द्रः ॥

(३६१।१)
कश्यपस्यसुवर्विदा६ए ॥ यावाहुस्स । युजावा१इती२३४ । ययोविश्वमपि ।
व्रता३म् ॥ यज्ञान्धी३राः ॥ निचा२३ । आ२या२३४ओहोवा ॥ ऊ२३४पा ॥
(स्व० ४ । प० ९ । वि० ५) २३ (ध्रु । ६१६)

॥ प्रैयमेधम् । प्रियमेधानुष्टुविन्द्रः ॥

(३६२।१)
अर्चतप्रार्चताना२३४राः ॥ प्रियमेधा३सो३अर्चत । अर्चन्तुपू२त्रा३काउत ॥
पुरामिद्धा२३ ॥ ष्णुवा३र्चा५ता६५६ ॥ (स्व० ३ । प० ५ । वि० ३) २४ (णि । ६१७)

॥ बार्हदुक्थम् । बृहदुक्थोऽनुष्टुविन्द्रः ॥

(३६३।१)
उक्थमिन्द्रा ॥ यश२ंसार३याम् । वार्द्धनपु । रुनिःपा२३इधाइ । शक्रोया३था३ ।
सुतेपु२३४ना: ॥ शरणा२३त्सा ॥ खियाइषू२३चा३४३ । ओ२३४५इ ॥ डा ॥
(स्व० १ । प० १० । वि० ६) २५ (ड्रू । ६१८)

॥ अग्नेर्वैश्वानरस्य सामनी ॥ [illegible]योरग्निरनुष्टुबग्निरिन्द्रो वैश्वानरो वा ॥

(३६४।१)
विश्वानरा ॥ स्यवा३स्पाती३म् । आनानत । स्यशावा२सा२ः । एवैश्वा । चर्षणा२इनाम् ॥
ऊ२ती ॥ हुवाइर । था२३४नो६हाइ ॥ (स्व० ४ । प० ९ । वि० ६) २६ (धू । ६१९)

Digitized by Madhuban Trust, Delhi

(३६४।२)
विश्वा३४ । नरस्यचौ । होस्पातीम् ॥ अनानता३ । स्याशावा२३४सा: ।
एवैश्वा । चर्षणा२३४इनाम् ॥ ऊतीहुवाइर ॥ था२३४नोवेहाइ ॥

(स्व० ६ । प० ९ । वि० ६)२७ (त्रू । ६२०)

॥ शाकपूते द्वे । द्वयोः शाकपूतिरनुष्टुबिन्द्रः ॥

(३६५।१)
सघायस्ता२इ । ए । दिवोनरा३: ॥ ए ॥ धियामर्त्ता३ । ए । स्यशमता३: ।
ए ॥ ऊताइसब्रू३ । ए । हतोदिवा३: । ए ॥ द्विषोअ२हा३: । ए । नातरति ।
इडा२३भा३४३ ओ२३४५इ ॥ डा ॥ (स्व० ६ । प० १८ । वि० ८)२८ (गै । ६२१)

(३६५।२)
सघायस्ताइ ॥ दिवोनरा: । धियामार्त्ता२ । स्यशमता: ॥ ऊतीसाब्रू२ ।
हवोदिवा: ॥ द्विषोआ२हा२: ॥ नातरति । इडा२३भा३४३ । ओ२३४५इ ॥डा॥

(स्व० ७ । प० ११ । वि० ७)२९ (चे । ६२२)

॥ वरुणान्याः साम । वरुणान्यनुष्टुबिन्द्रः ॥

(३६६।१)
विभोष्टइन्द्रराधा६सा: ॥ विभ्वीरा२ति:शतक्रता । शतारक्राताउ ॥ आथानोविश्वचर्षणे ।
श्वचार्षाणाइ ॥ शुम्न२सुदत्रम२हय । त्रमा३२हा५या६५६ ॥

(स्व० ८ । प० ७ । वि० ४)३० (ठी । ६२३)

उपसम्, औपसम् वा । उपानुष्टुबिन्द्रः उपा वा ॥

(३६७।१)
वयश्चा२इत्तेपतत्रिणा: ॥ द्विपाच्चतुष्पादर्जुनाये३ । ऊषःप्रारान् । ऋतू२रनू ॥
दिवोआन्ते२३ ॥ भा२३या३: । पा३४५रो२हाइ ॥

(स्व० ५ । प० ७ । वि० ६)३१ (फ्रू । ६२४)

॥ देवानां रुचिः रोचनम् वा । रुचिरनुष्टुबिन्द्रः विश्वेदेवा वा ॥

(३६८।१)
अमीयदेवास्थाना ॥ मध्यआरोचनेदिवा: ॥ कद्वऋताम् ॥ कदमार्त्ता२मृ ॥
काप्रत्नावआहू२३ती३४३: । ओ२३४५ इ ॥ डा ॥

(स्व० १० । प० ७ । वि० ८)३२ (फै । ६२५)

॥ ऋक् साम्नोः सामनी द्वे । द्वयोः ऋगनुष्टुबिन्द्रः ॥

(३६९।१)
ऋच२सामयजा । महाइ । याभ्यांकर्माणिकृण्वा२३ताइ । वितेसदसिराजा२३ता: ॥
यज्ञंदा२३इवे ॥ धूवक्षत: ॥ इडा२३भा३४३ । ओ२३४५ इ ॥ डा ॥

(स्व० ६ । प० ९ । वि० ६) ३३ (धू । ६२६)

CC-0. Shri Vipin K...

॥ साम्नः साम । सामानुष्टुबिन्द्रः ॥

(३६९।२)

ऋच २सा३मायजामहाइ॥ यास्याकर्मा । णिकाण्वा१ता२इ । ण्वाता२इ । वाइतसद । सिराजा१ता२ः । जाता२ः॥ यज्ञादा१इने२॥ पूवक्षतः । इडा२३भा३४३ । औ२३४५ इ ॥ डा ॥　　(स्व० ४ । प० १२ । वि० ९)३४ (थो । ६२७)

॥ त्रयोदशतृतीयः, द्वितीयः खण्डः ॥ २ ॥ दशतिः ॥ ८ ॥

॥ इत्यानुष्टुभमैन्द्रम् ॥

॥ त्रैशोकम् । त्रिशोको जगतीन्द्रः ॥

(३७०।१)

विश्वोहाइ॥ पृतनाअभिभू । तरन्नराः । सजूस्ततक्षुराइन्द्रंजजनूः । चराजासो२३४हाइ । ऋत्वोहोइ । वरोहोइ । स्थेमन्या२मू२३४रीम्॥ उतोहाइ॥ उग्रमो२३४जी । ष्ठंतारा२३४साम् । होइ । तरा३४ । स्विनम् । ओदवा॥ ओइदी२३४वा ॥

(स्व० ७ । प० १६ । वि० १४)३५ (ची । ६२८)

॥ इति ग्रामे गेय-गाने नवमः प्रपाठकः ॥९॥

॥ शैखण्डिने द्वे । द्वयोः शिखण्डी जगतीन्द्रः ॥

(३७१।१)

श्रत्ते३होइ । दधा३हो२३४ । मिप्रथमायम । न्यवाइन्यवाइ । अहा३नूहोइ । यद्दा३हो२३४ । स्युन्नर्यविवेः । अपाअपाः॥ उभे३होइ । यत्त्वा३हो२३४ । रोदसीधावताम् । अनूअनू॥ भ्यसा३द्धोइ । तशू३हो२३४ । ष्मात्पृथिवीचिद । द्रिवोद्रिवाः । द्रिवआ । ओहावा६ । हाउवा॥ ई२३४५ ॥

(स्व० ११ । प० २० । वि० १४)१ (ङ्री । ६२९)

(३७१।२)

श्रत्ता३१इ । दधा३१२३४ । मिप्रथमायम । न्यवाइन्यवाइ॥ अहा३१नू । यद्दा३१२३४ । स्युन्नर्यविवेः । अपाअपाः॥ उभा३१इ । यत्वा३१२३४ । रोदसीधावताम् । अनूअनू॥ भ्यसा३१त । तशू३१२३४ । ष्मात्पृथिवीचिद । द्रिवोद्रिवाः । द्रिवए । हियाहहा । होपइ ॥ डा ॥　　(स्व० ९ । प० २० । वि० १४)२(नी । ६३०)

Digitized by Madhuban Trust, Delhi

(३७१।३)   ॥ अत्रेर्विवतौ द्वौ। द्वयोरत्रिर्जगतीन्द्रः॥

अयो२३४वा। अयायो२३४वा। श्रात्ताइ। दा२३४धा। मिप्रथमायम।
न्यवाइन्यवाइ॥ अयो२३४वा। अयायो२३४वा। आहान्। या२३४द।
स्युन्नयविवेः। अपाअपाः॥ अयो२३४वा। अयायो२३४वा। ऊमाइ। या२३४त्वा।
रोदसीधावताम्। अनूअनू॥ अयो२३४वा। अयायो२३४वा। ष्यासात्।
ता२३४इशु। ष्मात्पृथिवीचिद। द्रिवोद्रिवाः। द्रिवआ। औहोवा६। हाउवा॥
द्रिवऔहो३हि९८१॥   (स्व० १३। प० २८। वि० १६)३ (ह्व। ६३१)

(३७१।४)

इयो२३४वा। इयायो२३४वा। श्राताइ। दा२३४धा। मिप्रथमायम।
न्यवाइन्यवाइ॥ इयो२३४वा। इयायो२३४वा। आहान्। या२३४द।
स्युन्नयविवेः। अपाअपाः॥ इयो२३४वा। इयायो२३४वा। ऊमाइ। या२३४त्वा।
रोदसीधावताम्। अनूअनू॥ इयो२३४वा। इयायो२३४वा। ष्यासात्।
ता२३४इशु। ष्मात्पृथिवीचिद। द्रिवोद्रिवाः। द्रिवआ। औहोवा६। हाउवा॥
द्रिवइहो३हि९८१॥   (स्व० १२। प० २८। वि० १६)४ (जू। ६३२)

(३७१।५)   ॥ महासावेतसे द्वे। द्वयोः सवेतसो जगतीन्द्रः॥

आ२३या३म्। श्रात्ताइ। दा२३४धा। मिप्रथमायम। न्यवाइन्यवाइ॥
आ२३या३म्। आहान्। या२३४द। स्युन्नयविवेः। अपाअपाः॥ आ२३या३म्।
ऊमाइ। या२३४त्वा। रोदसीधावताम्। अनूअनू॥ आ२३या३म्।
ष्यासात्। ता२३४इशु। ष्मात्पृथिवीचिद। द्रिवोद्रिवाः। द्रिवआ। औहोवा६।
हाउवा॥ द्रिवो३द्रिवा२३४५ः॥   (स्व० १२। प० २४। वि० २०)५ (झौ। ६३३)

(३७१।६)

अयंया३ः। श्रात्ताइ। दधा३१२३४। मिप्रथमायम। न्यवाइन्यवाइ॥ अयंया३ः।
आहान्। यद्दा३१२३४। स्युन्नयविवेः। अपाअपाः॥ अयंया३ः। ऊमाइ।
यत्वा३१२३४। रोदसीधावताम्। अनूअनू॥ अयंया३ः। ष्यासात्।
ताइशू३१२३४। ष्मात्पृथिवीचिद। द्रिवोद्रिवाः। द्रिवआ। औहोवा६।
हाउवा॥ द्रिव३इ२३४५॥   (स्व० १०। प० २४। वि० २०)६ (भौ। ६३४)

Digitized by Madhuban Trust, Delhi

(३७१।७) ॥ महोशैरीषे द्वे । द्वयोः शिरीषो जगतीन्द्रः ॥

औहोहोहाइ । श्रात्ताइ॥ दा२३४धा । मीप्राथा२३४मा ।
यमन्या२३४वे । यमन्या२३४वाइ । अहा३१२नुस्थिया२३४द्दा । स्युनारी२३४याम् ।
विवेरा२३४पौ । विवेरा२३४पाः॥ उभा३१२इया२३४त्वा ।
रोदासी२३४धा । वतामा२३४नू॥ वतामा२३४नू॥ भ्यसा३१२त्ता२३४इशू ।
ष्मात्पृथी२३४वी । चिदद्रि२३४वः । चिदद्रा२३४इवाः । द्रिवआ ।
औहोवा३ । हाउवा॥ ए३ । द्रिवइहा२३४५॥ (स्व० ३ । प० २३ । वि० १४)७ (डी । ३३५)

(३७१।८)
श्रत्ताऔहोहोहाइ॥ दधा३१२३४ । मिप्रथमायम । न्यवाइन्यवाइ ।
अहाऔहोहोहाइ । यद्दा३१२३४ । स्युनर्यैविवेः । अपाअपाः॥ उभाऔहोहोहाइ ।
यत्वा३१२३४ । रोदसीधावताम् । अनूअनू॥ भ्यसाऔहोहोहाइ । ताइशू३१२३४ ।
ष्मात्पृथिवीचिद । द्रिवोद्रिवः । द्रिवआ । औहोवा३ । हाउवा॥ द्रिवए३द्रिवा२३४५ः ॥
(स्व० १८ । प० २० । वि० २१)८(ण । ३३६)

(३७२।१) इन्द्रस्य प्रियाणि त्रीणि ८त्रयाणां इन्द्रो जगतीन्द्रः ॥

समाहाउ॥ आइतविश्वाओजसा३ । पतिमा३इ । दिवा२३४ः । हाहोइ ।
यआइका१ईर२त् । भूरातिथिः । जना२३ना३४म् । हाहोइ । सपूर्वियारः ।
नूतनमा । जिगा२३इषा३४न् । हाहोइ॥ तंवार्त्ता१नीरः ॥ अनुवाव्रुत । आये३ ।
कयाउवा३॥ वृधे१ । (स्व० १० । प० १८ । वि० १९)९ (वो । ३३७)

(३७२।२)
समेतविश्वाओजसापतिम् । एषातीम्॥ दिवया । हौ२ । हौ३हो३वा । ई३या ।
यआइका१ई२त् । भूरातिथिः । जना२३नाम् । हौ२ । हौ३हो३वा ।
ई३या । सपूर्वियारः । नूतनमा । जिगा२३इषान् । हौ२ । हौ३हो३वा ।
ई३या ॥ तंवार्त्ता१नीरः॥ अनुवाव्रुते । आये३ । कयाउवा३॥ वृधे१ ॥

(स्व० १० । प० २३ । वि० १४)१० (ची । ३३८)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(३७२।३)
समतविश्वाओजसापतिम् । एपातीम् ॥ दाइवा१यार । औ२ । हाँ३हो३वा ।
ओमोवा । यअ ..ा१ई२रत् । भूरातिथिः । जना२३नाम् । औ२ । हाँ३हो३वा ।
ओमोवा । सपूर्वा१या२ः । नूतनमा । जिगा२३इपान् । औ२ । हाँ३हा३वा ।
ओमोवा ॥ तंवार्ता१नी२ः ॥ अनुवावृतं । आये३ । कयाउवा३ ॥ धर्मण२३४५ ॥
(स्व० ९ । प० २३ । वि० १५)११ (दु । ६३९)

(३७३।१) ॥ वैरूपाणि त्रीणि । त्रयाणां इन्द्रो जगतीन्द्रः ॥
इमतआ ॥ द्रतवयंपुरू२ष्टूतार । यत्वारभ्यचरामसिप्रभू२वासा२उ ।
नहित्वदन्योगिर्वणागिरा२ःसाघा२त् ॥ क्षोर्णारिवप्रतितद्धर्यनो२वाचार२ः ॥
वचाआ२३४वा । हो५इ ॥डा॥ (स्व० ९ । प० ८ । वि० ६)१२(दृ । ६४०)

(३७३।२)
इमतआ ॥ द्रतवयंपुरु । ष्टुता । या१इत्वा२रास्या२ । चारामसिप्रभू । वसाउ ।
ना१ही२त्वादा२न् । योगिर्वणागिरः । सघात् ॥ क्षो२णी२राइवा२ ॥
प्रतितद्ध । यनावा२३चा३४३ः । ओ२३४५इ ॥ डा ॥
(स्व० ६ । प० १४ । वि० ९)१३ (घो । ६४१)

(३७३।३)
इमता२३इन्द्रतवयंपुरुष्टुतोवा ॥ यत्वाराभ्या२ । चरामसी२३प्रा३भूवसाउ ।
नहित्वादा२न् । योगिर्वणो२३गी३र:सघत् ॥ क्षोर्णारिवा२ ॥ प्रतितद्धा२३ ।
यनो६वचाः । हो५इ ॥ डा ॥ (स्व० ९ । प० १० । वि० ६)१४ (नू । ६४२)

(३७४।१) ॥ वार्हदुक्थम् । वृहदुक्थो जगतीन्द्रः ॥
चर्षणीधृत२हाउ ॥ मघवानमुक्था२३याम् । इन्द्रंगिरोवृहतीरभ्यनूषा२३ता ।
वावृधाना२म् । पुरुहूता२३म् । सुवा२र्क्ता२३४इर्भीः ॥ अमा२र्तियाम् ॥
जरमाणा२३म् । दा२३इवे३ । दा३४५इवो६हाइ ॥
(स्व० ५ । प० १० । वि० ११)१५(म । ६४३)

(३७५।१) ॥ त्रासदस्यवे द्वे । द्वयोस्त्रसदस्युर्जगतीन्द्रः ॥
अच्छावइन्द्रंमतयःसुवर्युवा६ए ॥ सध्रीचीर्विश्वाउशतीरनू२षाता२ ।
परिष्वजन्तजनयोयथा२पतीरम् ॥ मर्यन्ना२३शू । ध्युम्म । घवा२ ।
नमू२४औहोवा ॥ तवा२ई२३४५ ॥ (स्व० ८ । प० ८ । वि० ६)१६ (ड्ड । ६४४)

CC-0. Shri Vipin Ku...

Digitized by Madhuban Trust, Delhi

(३७५।२) ॥ अच्छत्रासदस्यवम् ॥

आ२३४। च्छावइन्द्रम । तयाः । सुतयुवा२३ः॥ सा२३४। प्रीचीविश्वाउ ।
शतीः । आनूषता२३॥ पा२३४। रिष्वजन्तज । नयाः। याथापता२३इम्॥
मा२३४। यन्नशुन्ध्युम्म । घवा । नामूतया३१उ॥ वा२३४५॥

(स्व० ११। प० १०। वि० ९)१७ (खो । ३४५)

(३७६।१) ॥ जागत२ सोमसाम । सोमो जगतीन्द्रः ॥

अभित्या३०मपपुरुहू॥ तमृग्माया२म्। इन्द्रंगीर्भाइः। मदतावस्व३अ वम्।
ओ३४। हाहोइ। यस्यद्यावोनविचरन्ति३मानुषम्। ओ३४। हाहोइ॥
भुजेम२हिष्ठमभिविप्रमचेत। दुरा२। तिना२३४औहोवा॥ ऊ२३४पा॥

(स्व० १०। प० १३। वि० ९)१८(ज्वो। ३४६)

(३७७।१) ॥ सौभरम्। सुभरिर्जगतीन्द्रः ॥

त्व२सू३मेपंमहया॥ सुववाइदा२म्। शतंयस्यसुभुवस्साक३माइरा१ता२इ।
अत्यंनवाज२हवनस्य३दा२रा१था२म्॥ आइद्रंववृत्याम॥ वसाये३।
सूरवृ२३४औहोवा॥ क्षी२३४भीः॥ (स्व० ६। प० ८। वि० ८) १९)(गै। ३४७)

(३७८।१) ॥ जागतं वरुणसामनी द्वे। द्वयोर्वरुणो जगतीद्यावापृथिव्यौ ॥

घृतव। ता३इभुवनानाम्। अभिश्रिया॥ उर्वीपृथ्वीमधुदुवेसुपेशसा२३होइ।
द्यावापृथिवीवरुणा। स्याधर्मणा२३। होइ॥ विष्काभा२३इते॥ आजरे।
भूरि। रेय३। तसाउवा३॥ ए३। इन्दुरसमुद्रर्विययाविभातीर२३४५॥

(३७८।२) (स्व० १४। प० १४। वि० ६)२०(धू। ३४८)

घृतवतीभुवनानाम। भा५इश्रिया॥ उर्वीपृथ्वीमधुदुघेसुपेशा२सा।
द्यावापृथिवीवरुणा। स्याधर्मणा॥ वाइष्कभिताइ॥ अजरे२भूरि। राये३।
तसाउवा३॥ इन्दुरसमुद्रमुर्वियाविभातीर२३४५॥ (स्व० १५। प० १०। वि० ४)२१(मी। ३४९)

(३७९।१) ॥ श्येनम्। इन्द्रो जगतीन्द्रः ॥

उभेयदिन्द्रोदसाइ॥ आ२३पा। प्राथउषा३१उवा२३। इवआ।
महान्तन्त्वामाहाइनान्॥ संम्रा३हो॥ जंचर्षणा३१उवाये३। ना३मा।
देवीजनित्रियाजी१जाना२त्॥ भद्रा३हो॥ जानित्रियजा३१उवा२३॥
ए३। जनदा३२॥

(स्व० ६। प० १३। वि० ९)२२ (गो। ३५०)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(३८०।१)   ॥ वैरूपम् । विरूपो जगतीन्द्रो मरुत्वान् ॥

प्रमंदा२३४इने ॥ पितुमदा३र्चा३तावचः । यःकृा३ओ२३४वा ।

ष्णगर्भानिरहन्नृजिश्वना३ । अवस्या२३४वाः । वृषणंवा । व्रादक्षा२३४इणाम् ।

मारौवाओ२३४वा ॥ त्वन्त२सख्यायहुवा६इमहाउ ॥ वा ॥

(स्व० ३। प० १०। वि० ९)२३ (णो। ६५१)

॥ चतुर्विंशति चतुर्थः, तृतीयः खण्डः ॥ ३ ॥ दशतिः ॥ ३॥

॥ इत्यैन्द्राख्ये तृतीयेगाने अनुष्टुबाख्यम् ॥

॥ पञ्च तन्त्रं संपूर्णम् ॥

॥ इति जागतम् ॥

(३८१।१)   ॥ कौशम् । इन्द्र उष्णिगिन्द्रः ॥

इन्द्रा ॥ सुतेपुसोमे । षु । होइ२ । हैं । वाहोइ । क्रतुंपुनीषउक्थियाम् ।

विदाइवा१र्द्धा२३ ॥ स्या३दाक्षा३स्या ॥ महा२३४हिषा३४३ः । ओ२३४५इ ॥ डा ॥

(स्व० ५। प० १२। वि० ७)२४ (फे। ६५२)

(३८१।२)   ॥ अनुकौशम् । इन्द्र उष्णिगिन्द्रः ॥

इन्द्रा३होइ । हवे३होइ ॥ सुतपुसोमेपुक्रतुम्पुनीषउक्थियाम् ॥ विदाइवा१र्द्धा२ ।

स्यदक्षस्या । मा३हा४हि ॥ पा२३४५ः ॥   (स्व० ५। प० ७। वि० ६)२५ (फ्रू। ६५३)

(३८१।३)   ॥ कौत्सम् (कौशम्)। कुत्स उष्णिगिन्द्रः ॥

इन्द्रसुतेपुसोमेषू ॥ क्रतू२०पुनाइ । षउक्थियाम् । विदेवार्द्धा२ । स्यदक्षस्या ॥

महा४हाइवा२ः ॥ महा२३४हिषा३४३ः । ओ२३४६इ ॥ डा ॥

(स्व० ४। प० ९। वि० ७)२६ (धे। ६५४)

(३८२।१)   ॥ दैवोदासे द्वे । द्वयोः दिवोदास उष्णिगिन्द्रः ॥

हाउतमूवभी ॥ प्रगायता । हाउ । पुरुहू२३४ताम् । पुरुष्टुताम् । हाउ ॥

इन्द्रंगा२३४इर्भीः ॥ तवाइपा२३मा३४ । हाउ । विवा३सा५ता६५६ ॥ दी२३४वी ॥

(स्व० ६। प० ११। वि० ९) २७ (क्रो। ६५५)

(३८२।२)

ता४मूवभी । होइ । प्रगायतादिए ॥ पुरुहू३ताम् । पुरूष्टू३ता३म् ।

पूरू२ष्टू२३४ताम् । इन्द्रांगी३र्भाइः । तवाइपा३मा । विवासा३ता२ ।

विवा२सा२३४ता । आइन्द्रा३४म् । गीर्भी३इः । तविषम् । आ ॥

विवा२३हा३ ॥ साताओ२३४वा ॥ ऊ२३४६ ॥   (स्व० ३। प० १७। वि० १६)२८(डी। ६५६)

CC-0. Shri Vipin K

Digitized by Madhuban Trust, Delhi

॥ प्रहितोः संयोजने द्वे । द्वयोः ओकोनिधनं प्रहितिरुष्णिगिन्द्रः ॥

(३८३।३)
तमू३अभिप्रगायता॥ पुरू । हूतंपुरूरष्टूतारम् । इन्द्रा२०गाइर्भीरः ।
तविषार२३४मा॥ विवार२३॥ सा२ता२३४औहोवा॥ ओ२२३४काः ॥

(स्व० ४ । प० ८ । वि० ६)२९ (दू । ६५७)

(३८३।४)
तमू३अभिप्रगायतेदाम्॥ पुरू । हूतंपुरूरष्टूतारम् । आइन्द्रंगीर्भिस्तविषमा ।
विवासा१तारे । आइन्द्रंगा२३४५इ । भा२३४५इः॥ तवाइषार२३माइ ॥
वा२इवा२२३४औहोवा॥ सतए२३४५॥

(स्व० ७ । प० १० । वि० १२)३०(आ । ६५८)

॥ हारिवर्णानि चत्वारि । चतुर्णां हारिवर्ण उष्णिगिन्द्रः ॥

(३८३।१)
तंत५सदम् । गृणी५मसि॥ वृषा । णंपृक्षुसासा२हाइम् । उलोका । कृत्नुमद्राइ ॥
होहा२२३री३॥ श्रा२२३या२३४३म् । ओ२३४५इ॥ डा ॥

(स्व० ३ । प० १० । वि० ६)३१ (णू । ६५९)

(३८३।२)
ता४०तं । होइ । मदंगृणीमसी६ए॥ वृषाहो२ । णंपृक्षूसा१साही२म् ॥
उलोककृत्नुमद्रिवोहा१री२॥ श्रियाम् । औ२३होवा । हो५इ॥ डा ॥

(स्व० ३ । प० १० । वि० ५)३२ (णु । ६६०)

(३८३।३)
तंतमदंगृणीमसी६ए॥ वृषाओ३हो२३४ । णंपृक्षुसासहीम् । उलाओ२हो२३४ ।
ककृत्नुमद्रिवाः॥ हरो२३४वा॥ श्रा५योद्हाइ ॥

(स्व० ३ । प० ७ । वि० ६)३३ (हू । ६६१)

(३८३।४)
तंतमदा५०गृणीमसाइ॥ वार्षणंपृ । क्षुसासा३ही३म् । होवा३हाइ ॥
रलोका३कृ३ । होवा३हा॥ त्नुमा२३ । द्रा२इवा२३४औहोवा ।
हरिश्रिया२२३४५म् ॥

(स्व० ४ । प० ९ । वि० ६) ३४ (धू । ६६२)

॥ इति ग्रामे गेय-गाने दशमस्यार्द्धः प्रपाठकः ॥

॥ त्रैतानि चत्वारि । चतुर्णां त्रित उष्णिगिन्द्रः ॥

(३८४।१)
यत्सोममिन्द्रविष्णावी॥ यद्वाघत्रितआप्तियाइ॥ यद्वामरुत्सुम३०दासो२३४हाइ॥
सा२मा२३४औहोवा॥ ए३ । दुर्भी२३४५ः॥

(स्व० ६ । प० ६ । वि० ५)१ (कु । ६६३)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(३८४।२)

यत्सोममा५इन्द्राविष्णवाइ ॥ यद्वाघात्रितआप्ता२याइ ॥ यद्वामा२रुत्सुमा ॥

दासाये३ । सा२मा२३४औहोवा ॥ दू२३४भीः ॥

(स्व० ६ । प० ६ । वि० ६) २ (कू । ६६४)

(३८४।३)

हाओहायत्सोममा ॥ द्रा२वा२३४औहोवा । ष्णा२३४वी ।

यद्वा२घत्रितआ२प्तिये । यद्वामरुत्सुमा२३हो । दसा२इ ॥ समा२३होये३ ॥

दुभिरो२३४५इ ॥ डा ॥

(स्व० १० । प० ५ । वि० ५)३ (भु । ६६५)

(३८४।४)

औहो३१इ । औ२हो२३४वा । यत्सोममी३०द्रा३विष्णवाइ ॥

औहो३१इ । औ२हो२३४वा । यद्वाघत्री३ता३आप्तियाइ ॥ औहो३१इ ।

औ२हो२३४वा । यद्वामरू३त्सू३मंदसाइ ॥ औहो३१इ । औ२हो२३४५वा६५६ ॥

समिन्दुभी२३४५ः ।

(स्व० ८ । प० १२ । वि० १)४ (ओ । ६६६)

(३८५।१) ॥ सुराधसम् । सुराधस उष्णिगिन्द्रः ॥

एदुमधोः । मदा३२इन्ता२३४राम् । सिञ्चाध्वर्यो अन्धसा२ः । धा२३४साः ॥

एवाहिवीरस्तवता२इ । वा२३४ताइ ॥ सदा३वा५द्धा६५६ः ॥

(स्व० ७ । प० ७ । मा० १) ५ (छो । ६६७)

(३८५।२) ॥ प्रराधसम् । प्रराधस उष्णिगिन्द्रः ॥

एदुमधौहो५मदिन्तराम् ॥ सिञ्चाहो२इ । अध्वर्यो अंधासा२ः ॥

आइवा१हिवी२ ॥ रा२स्तवताइ । सदावृ । धा । औ३होवा । हो५इ ॥ डा ॥

(स्व० ३ । प० १० । वि० ७)६ (चे । ६६८)

(३८६।१) ॥ विकल्पमारुतम् । महत उष्णिगिन्द्रः ॥

ए५०दुमि । द्रा३या३सिञ्चता ॥ पिबा२तिसोम्यंमधु । प्रराधा२३४सी ॥

चोदयताइमा२हौ ॥ त्वना । औ३होवा । हो५इ ॥ डा ॥

(स्व० ४ । प० ५ । वि० २)७ (धा । ६६९)

(३८७।१) ॥ वैश्वमनसम् । विश्वमना उष्णिगिन्द्रः ॥

एतोन्विन्द्र५स्तवा५मा ॥ साखायस्तो२ । मिया३४५म् । नरमाकृष्टीर्योविश्वाअभि ॥

आ । स्तियाये ॥ काई२दा२३४औहोवा ॥ ऊ२३४५ ॥

(स्व० ५ । प० ८ । वि० ५)८ (वी । ६७०)

CC-0. Shri Vi...

Digitized by Madhuban Trust, Delhi

॥ सौमित्राणि त्रीणि । त्रयाणां सुमित्र उष्णिगिन्द्रः ॥

(३८८।१)
इन्द्रायसा॥ मागायत। वाइप्रा१याबृ२। हातेबृहत्॥ ब्राह्मकृते२॥
विपा२३ः। चा२इता२३४औहोवा॥ पनस्यवे२३४५॥
(स्व० ५। प० ८। वि० ५)९ (बु। ६७१)

(३८८।२)
इन्द्रा३४। यसाम। गायाइता॥ वाइप्रायबृ२। हता३४५इ। बृ२३४हात्।
ब्रह्मकृत२विपश्चिते२॥ ओये३। पा२ना२३४औहोवा॥ स्या२३४वे॥
(स्व० ७। प० १०। वि० ४)१० (त्री। ६७२)

(३८८।३)
औहोहोइ। औ३हो३इ। औ३२३४५वा६५६। इन्द्रा२यसामगायत॥
विप्रा२यबृहतेबृहत्॥ ब्रह्मकृत२विपश्चिते२॥ औहोहोइ। औ३हो३इ।
औ३२३४५वा६५६॥ ए३। पनस्यवे२३४५॥ (स्व० ११। प० ११। वि० ५)११ (कु। ६७३)

॥ त्रैककुभानि त्रीणि। त्रिककुबुष्णिग्वसर्वीशानेन्द्रः ॥

(३८९।१)
यएकइदिहाहाऊ॥ विदयताइ। वसुमा२३र्त्ता। यदाशुपाइ॥ ईशानो२३आ॥
प्रातिष्कुता३१उवा२३। ई२३४०द्राः। अंगा। औ३होवा। हो५इ॥ डा॥
(स्व० ६। प० ११। वि० ९)१२ (को। ६७४)

(३८९।२)
या२३४ए। का२३४ईत्॥ वीदाया२३४ताइ। वासुमर्त्ता२३हा३।
यादाशू२३४पाइ। आईशानोअ। प्रता२३हाइः॥ ष्कू२३४ताः। आइन्द्रोअ।
गा२। या२३४औहोवा। ई२३४०द्राः॥ (स्व० ५। प० १२। वि० १३)१३ (फि। ६७५)

(३८९।३)
यएकइद्विदायाइताइ॥ वासुमर्त्ताया३दा। हुम्। शू२३४पाइ।
आइशानोअप्रतिष्कुतः। आइशा। नोअप्रताइ॥ ष्कू२३४ताः॥ आइन्द्राअ।
गा२। या२३४औहोवा॥ ई२३४०द्राः॥ (स्व० ९। प० १२। वि० १६)१४ (धू। ६७६)

(३९०।१) ॥ औक्ष्णोरन्ध्राणि-नियनानि वा त्रीणि। त्रयाणामुक्ष्णोरन्ध्रोष्णिगिन्द्रः ॥
सखायआहाउ॥ शिषा३महेहाउ। ब्रह्मा३इन्द्राहाउ। यवज्रिणाइ।
स्तूषऊपृ३हाइ। वोनृत्तमा२३हा॥ यधा२३॥ ष्णा२वा२३४औहोवा॥
ऊ२३४पा॥ (स्व० ४। प० ९। वि० ९)१५ (ध्वो। ६७७)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(३९०।२)

सखायआशिषाम । हाइ । म्रहेन्द्रायवज्रिणोवा ॥ आइ्तीरवाइ ।

होवाइहाइ । हाइ । स्तुषऊपूर३४ । वोहोहाइ ॥ नात्तीइमाइ ।

होवाइहाइ । हा ॥ यधार२३ ॥ ण्णारवार२३४औहोवा ॥ ई२३४५ ॥

(३९०।३) (स्व० ८ । प० १४ । वि० ७)१६ (द्वे । ६७८)

सा४खायः । आशिषा । सा२हाइ । म्रहेन्द्रायवज्रिणो । हाइ ॥

स्तुषऊषुवो२नार्त्तामा । या२३४धृ । हा२हाइ । वोनार्त्तामा । या२३४धृ ।

हा२हा ॥ ण्णवा३इ । औ२हो । औहोवा ॥ ण्णवा३इ । औ२हो ।

औहोवा३४ । औहोवा ॥ ऊ२२३४पा ॥ (स्व० १४ । प० १९ । वि० ७) १७ (ब्ले । ६७९)

॥ अष्टाविंशति प्रथमः । चतुर्थः खण्डः । दशतिः ॥ १० ॥

॥ इति द्वितीयोऽर्धः, चतुर्थः प्रपाठकश्च समाप्तः ॥

(३९१।१) ॥ प्रयस्वम्, प्रयस्वद्वा । प्रजापतिरुष्णिगिन्द्रः ॥

हाउगृणाइ ॥ तदा३इन्द्राताइ । शवा२३१२३ः । उपा२मान्दे । वतातयाइ ।

यद्ध२सार२३इवा । त्रमो२जासा ॥ शाची ॥ पते । औ२३होवा३४ । औहोवा ॥

वू२३४र्मीः ॥ (स्व० ५ । प० १२ । स्व० ८) १८ (फैं । ६८०)

(३९१।२) ॥ आक्षारम् । प्रजापतिरुष्णिगिन्द्रः ॥

गृणे । तदा३४ । औहो५इन्द्रतेशवाः ॥ उपमांदेवताता२३या३४३ ॥

यद्धा३४९सिवा ॥ त्रमोजसा । शा३शीप ॥ ता२३४५३ ॥

(स्व० ८ । प० ८ । वि० ४)१९ (डी । ६८१)

(३९१।३) ॥ प्रयस्वम्, प्रयस्वद्वा । प्रजापतिरुष्णिगिन्द्रः ॥

गृणतद्धोहो५इन्द्रतेशवाः ॥ उपमान्दे२वता२रतये । उपमांदे । वतता२३याइ ॥

यद्ध२सिद्र । त्रमो२३जसाऊ । चा३ । शा२३४ची । पा२३४ताइ ।

हो२३४५३ ॥ डा ॥ (स्व० १० । प० ११ । वि० ६)२० (पू । ६८२)

(३९२।१) ॥ दैवोदासानि चत्वारि । चतुर्णां दिवोदास उष्णिगिन्द्रः ॥

यस्या३१ । त्यच्छा३१२३४म् । बरम् । मा३दाइ ॥ दिवो३१ ।

दासः३१२३४ । यर । घा३यान् ॥ अया३१म् । ससो३१२३४ । मइ ।

द्रा२ताइ ॥ सुता३१ः । पिबा३ । औ२३४वा ॥ ऊ२३४पा ॥

(स्व० १ । प० १६ । वि० ८)२१ (कै । ६८३)

CC-0. Shri Vipin Kumar Col...

Digitized by Madhuban Trust, Delhi

(३९२।२)

यस्यत्यच्छा५०वरंमदाइ॥ दिवोदासायरंधयन् ॥ आयँ२ससो३॥ मइ । द्रता३इ ।
सू२ता२३४औहोवा॥ पी२३४वा ॥ (स्व० ५ । प० ७ । वि० ५)२२(फु । ६८४)

(३९२।३)

यस्यत्या३च्छा०वरमन्दाइ॥ दिवो२दासायरंधयन्॥ आयँ२ससो३ ।
मइ । द्रता३इ । सुतआ२३ः । पा२इवा२३४औहोवा॥ ई२३४ती ॥
(स्व० ५ । प० ८ । वि० ८)२३ (वै । ६८५)

(३९२।४)

या४स्यत्यत् । होइ । शंवरंमदा६ए॥ दिवोदासायरंधयन्नया२सा३सो । मई ।
द्रता३४ । औहोवा । सू२३४ताः॥ पिवो२३४५इ ॥ डा ॥
(स्व० ५ । प० १० । वि० ६)२४ (मू । ६८६)

॥ सांवर्ते द्वे । द्वयोरिन्द्र उष्णिगिन्द्रः ॥

(३९३।१)

एन्द्रनाः॥ गधिप्रा२३या । सात्राजित् । अगोहा२२या३४ ॥ गिरा३४इर्नवाइ ।
श्वताःपार्थू३ः । पा२ता२३४औहोवा॥ दी२३४वाः ॥
(स्व० ५ । प० ८ । वि० ७) २५ (त्रे । ६८७)

(३९३।२)

एन्द्रनो५गधिप्राया॥ सात्राजित् । अगोहायो । हो३वा ॥ गिराइर्नवौ ।
हो३वा । श्वता२३ः । पा२थू२३४औहोवा॥ पतिर्दिवा१ः ॥
(स्व० ६ । प० ३ । वि० ५)२६(घु । ६८८)

॥ यामम्, आक्षारं वा । यम उष्णिगिन्द्रः ॥

(३९४।१)

यइन्द्रसो॥ मापा३तायाः । मदा३शवाइ । छ्येततााइ॥ याइना३हा२ती ॥
नियत्रिणाम् । ता३मीम॥ हा२३४५इ ॥ (स्व० २ । प० ८ । वि० ७) २७ (जे । ६८९)

॥ दीर्घायुष्यम् । प्रजापतिरुष्णिगिन्द्र आदित्यो वा ॥

(३९५।१)

तुचेतुना । यता३२त्सू२३४नाः॥ द्राघीया२३४यूः । जीवासा२इ ॥
आदी२त्यासाः॥ समहसा२ः । कृणो३ता५॥ नां२३४५ ॥
(स्व० ३ । प० ८ । वि० ५)२८ (डु । ६९०)

॥ शुन्ध्युस्साम । भरद्वाज उष्णिगिन्द्रः ॥

(३९६।१)

वेत्थाहिनिर्ऋतीनाम्॥ वाज्रहस्तपरिव्रं । जाम्॥ अहर । हाः॥ शुन्ध्युःपरि ।
पदा३मा५इवा६५६॥ (स्व० ३ । प० ७ । वि० ४)२९ (डी । ६९१)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(३९७।१) ॥ अपामीवम् । आदित्य उष्णिगादित्यः ॥

अपामीवामपा॥ स्त्रिधाम् । अपसेधतदुर्मा२३तीम् । आदीरत्यासार:॥

युयातनानओवा२ओर२३४वा॥ हा५सोद्६हाइ ॥ (स्व० ६ । प० ६ । वि० ६)३० (क्रू । ६९२)

(३९८।१) ॥ वैराजे द्वे । द्वयोरिन्द्रो विराडिन्द्रः ॥

पिबा॥ सोममिन्द्रमन्दतुत्वा२ । यंतेसुषावहरिया॥ श्वा२३द्रीः । सो२३तूः॥

बाहूभी३या३म् । सुया२ता२३४औहोवा॥ ए३ । नार्वा२३४५ ॥

(स्व० ७ । प० ९ । वि० ४)३१ (झी । ६९३)

(३९८।२) ॥ सहोदैर्घतमसम् ॥

हाउपिबा॥ सोममिन्द्र । मा । दतुत्वा२ । दतुत्वा । यन्तेसुषावहरिया ।

श्वा१द्रीरः । श्वाद्रीरः॥ सोतुर्बाहुस्याम् । सुयता२ः । सुयता२ः॥

नार्वा२३४औहोवा॥ ई२३४५ ॥ (स्व० ६ । प० १३ । वि० ७)३२(ग्रे । ६९४)

॥ इति पञ्चदश द्विर्चेण, पञ्चमः खण्डः ॥ ५॥ दशतिः ॥१॥

॥ इत्यौष्णिहम् ॥

(३९९।१) ॥ अभ्रातृव्यं । इन्द्रः ककुबिन्द्रः ॥

अभ्रातृव्योऽअनातुवाम्॥ अनापिराइन्द्रा२ । जनुषा२॥ सना३४५त्॥

आ२३४सी । युधेदा२पित्वमिच्छसे॥ युधा१ ॥ (स्व० ६ । प० ७ । वि० ४)३३(खी । ६९५)

(४००।१) ॥ शार्करे द्वे । द्वयोः शार्करः ककुबिन्द्रः ॥

योनोहाउ॥ इदाम् । इदंपुरा२३हाउ । प्रवा । प्रवस्यआ२३हाइ । निना ।

निनायतमुवा२३हाउ । स्तुषाइ । सखायआ२३हाइ॥ द्रमूता२३या२३४३इ ।

औ२३४५इ ॥ डा ॥ (स्व० ४ । प० १२ । वि० ११)३४(थ । ६९६)

(४००।२)

योना३इदमिदंपुरा॥ योनइदमिदा१०पू३रा । प्रवस्यआनिना । यत्ता३मू३वस्तुषाइ॥

निना । यता३मू३वस्तुषाइ॥ सखाया२ः । आ२३इ । द्रमू३ता५या६५६इ॥

(स्व० ३ । प० ९ । वि० ८)३५ (है । ६९७)

॥ इति ग्रामे गेय-गाने दशमः प्रपाठकः ॥ १० ॥

(४०१।१) ॥ बृहत्कम् । बृहत्ककुम्मरुतः ॥

आगन्ता॥ मारिषण्या२३ता । प्रस्थावानोमापस्थात । सामन्यावा२ः॥

दृढाचीद्या३॥ मयोवा । ण्णा५वोद्६हाइ ॥ (स्व० ७ । प० ७ । वि० २)१(छा । ६९८)

॥ सौयवसानि त्रीणि । त्रयाणां सूयवसः ककुबिन्द्रः ॥

(४०२।१)

आयाही॥ अयमिन्द्वे । श्वपा२३ताइ । गोपतउ । वोरा१पाता२३४इ ॥
सोमा३म्॥ सोमा२३ । पारिता२३४औहोवा ॥ पी२३४वा ॥

(स्व० ७ । प० ९ । वि० ५) २(ह्रु । ६९९)

(४०२।२)

आयाहिया॥ या२माइंदा२वे । आश्वपतेगोपते । ऊ । वेरा२३हा३इ ।
पा३ताइ ॥ सो२३४म५हाइ॥ सो । म । पते३हा३इ । पा२३४इवा ॥
एहियाऽहा । हो५इ ॥ डा ॥

(स्व० ६ । प० १४ । वि० ७)३(वे । ७००)

(४०२।३)

आयाह्यमिन्दा३वाइ॥ अश्वापा१ता२इ । गोपाताऊ३ । वेरा२पा२३४ताइ ॥
सोम२सोमा३१॥ पताइ । पिबा३ओ२३४वा॥ ऊ२३४पा । ऊपा ॥

(स्व० ३ । प० ९ । वि० ६)४ (ह्रु । ७०१)

(४०३।१)   ॥ धेनुवाम । मरुतः ककुबिन्द्रः ॥

त्वयाहस्वीत्॥ युजावयम् । प्रातिश्वासा२ । तंयुभ । व्रुवी१माहा२३४इ ॥
स२स्था३इ॥ जानस्यगो२३४वा॥ मा२३४ताः ॥

(स्व० २ । प० ८ । वि० ५)५(त्रु । ७०२)

(४०४।१)   ॥ संवेशीयम् । मरुतः ककुम्मरुतः ॥

गावश्चिद्वासा३मन्यवाः॥ सजात्येनमरुतस्सबन्धवा२३होइ॥
रिहतेकाकू३भो॥ मिथा । औ३होवा । हो५इ ॥ डा ॥

(स्व० ५ । प० ७ । वि० ३)६(कि । ७०३)

(४०५।१)   ॥ आभरे द्वे । द्वयोरिन्द्रः ककुबिन्द्रः ॥

त्वन्नई॥ द्रआभा२३रा । ओजोनृम्णम् । शातक्रा३उ । वीचर्षा२३४णाइ ॥
आवीरंपा३हा३ ॥ तारना२३४औहोवा ॥ सा२३४हाम् ॥

(स्व० ५ । प० ८ । वि० ७)७(वे । ७०४)

(४०५।२)

त्वन्नइन्द्रा॥ आभा२३रा । ओजोनृम्णम् । शातक्रता३उ । वीचर्षा२३४णाइ ॥
आवीरा२३०पा॥ तनासहाम् । औ२३होवा । हो५इ ॥ डा ॥

(स्व० ५ । प० १० । वि० ६)८ (म्रू । ७०५)

Digitized by Madhuban Trust, Delhi
CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(४०६।१) ॥ ऐषिराणि त्रीणि । त्रयाणां वायुः ककुबिन्द्रः ॥

अधाहिया॥ द्रगिर्वा२३णाः । उपत्वाका । मईमा२३हाइ । ससृग्मा२३हाइ ॥

ऊदे२॥ वग्मा२३०ताः । उदा२३भाइः । इडा२भीः । हो५इ ॥ डा ॥

(४०६।२) (स्व० ४ । प० ११ । वि० ९)९ (तो । ७०६)

अधाहीन्द्रगिर्वा२णाः॥ ऊपत्वाका । माई१माहा२इ । सासृग्माहा२इ ॥

ऊदे१वाग्मा२३ ॥ तओवा । दा२भोऽहाइ ॥ (स्व० ४ । प० ७ । वि० ६)१० (घ्रू । ७०७)

(४०६।३)

अधाहीन्द्रगिर्वणा२ए॥ उपत्वाका । माई१माहा३इ । सासृग्मा२३४हाइ ॥

ऊदो३हो३ । वा२हा३॥ ग्मा२ । तऊ३४औहोवा ॥ दभी३२२३४५ ॥

(स्व० ६ । प० ९ । वि० ३)११ (घ्रू । ७०८)

(४०७।१) ॥ सीदन्तीये द्वे । द्वयोः प्रजापतिः ककुबिन्द्रः ॥

सा३४इ । दन्तस्तव । योया२था॥ गोश्राइतम । धामदिराइ । वा३इक्ष ।

णा२३४५इ ॥ अभित्वामाइन्द्रा३नो३॥ नू३४५॥ मा२३४५ः ॥

(स्व० ६ । प० १० । वि० ७)१२ (डे । ७०९)

(४०७।२)

सीदन्तस्तवयः । यथा३ । गो२३४ । श्रीतेमधौम । दिराइ॥ विवा३ ।

हा३ । क्षा२३४णाउ ॥ अभी३ । हो३इ । त्वा२३४मा॥ द्रनो३ ।

नू२३४माः । उहुवा२हाउ ॥ वा ॥ (स्व० ५ । प० १५ । वि० ३)१३ (मू । ७१०)

(४०८।१) ॥ सौभरे द्वे (प्रथम्) । द्वयोः सुभरिः ककुबिन्द्रः ॥

वयमुत्वामपूर्विया॥ स्थूरन्नकच्चिद्भरन्तआवस्यावा२३४ः ॥ वज्रिन् ।

चित्रा३म्॥ हा२३वा३ । मा३४५होऽहाइ ॥ (स्व० ३ । प० ६ । वि० ५)१४ (ड्ड । ७११)

(४०८।२) ॥ सौभरम् ॥

वयमुत्वामपूर्व्यस्थूरन्नकच्चिद्भरन्तः । ओवा॥ हा३हाइ । अवस्यावा२३४५ः ॥

हा२हाइ ॥ वज्रिन्चित्रा२३४५म्॥ हा३हाइ । हवा३ । मा२३४हाइ ॥

उहुवा२हाउ ॥ वा ॥ (स्व० ३ । प० ११ । वि० ८)१५ (डे । ७१२)

अष्टादश सूक्ष्मः, षष्ठः खण्डः ॥ ६ ॥ दशतिः ॥ २ ॥

॥ इति काकुभम् ॥

CC-0. Shri Vipin K

Digitized by Madhuban Trust, Delhi

॥ यामम् । यमः पंक्तिरिन्द्रः ॥

(४०९।१)
स्वादोरित्थाविषू । वताः । मा२३४ । ध्वोःपिबन्तिगौ । रियाः ॥
याइन्द्रेण । सयावा२३रीः । वृष्णामद । तिशोभा२३था ॥
वस्वाइरा१नू२ ॥ स्वाराजियम् । इडा२३भा३४३ । ओ२३४५इ ॥ डा ॥

(स्व० १२ । प० १४ । वि० ७) १६ (झे । ७१३)

॥ गृत्समदस्य मदौ द्वौ । द्वयोः गृत्समदः पंक्तिरिन्द्रः ॥

(४१०।१)
इत्थाहिसो ॥ मइन्मा२३दाः । ब्रह्मचक्रा । रवर्द्धा२३नाम् । शविष्ठव ।
त्रिन्नोजा२३सा । पृथिव्यानिःशशाअहिम् ॥ अर्चाना१नू२ ॥ स्वरौहो२ ।
जियमो२३४५इ ॥ डा ॥

(स्व० ५ । प० ११ । वि० ६) १७ (पू । ७१४)

(४१०।२)
इत्थाहिसो५मइन्मदाः ॥ ब्रह्मचक्रा । रवर्द्धा२३नाम् । शाविष्ठा२३४वा ।
त्रिन्नोजा२३४सा । पृथिव्यानिःशशाअहिम् ॥ अर्चा२न्हो३इ । अनू२३हो ॥
स्वाराजियम् । इडा२३भा३४३ । ओ२३४५इ ॥ डा ॥

(स्व० ५ । प० १२ । वि० ८)१८(फै । ७१५)

॥ आभीके द्वे । द्वयोरभीकः पंक्तिरिन्द्रः ॥

(४११।१)
इन्द्रोमदायवा३ । वाद्धा३इ ॥ शवसेवृत्रहा३ । नृभीः । तमिन्महत्सुवा३ ।
जाइषू ॥ ऊतिमर्भेहवा३ । माहाइ ॥ सावा । जाइपुप्रनो२३४वा । वा५इपो६हाइ ॥

(स्व० ५ । प० ११ । वि० ७)१९ (पे । ७१६)

(४११।२)
इन्द्रोमदा५यवावृधाइ ॥ शवसेवृ । त्रहानृभी३४ः । ताम् । इन्माहा२३४त्सुवा६ ।
हाउ । जाइषू । ऊतिमर्भेहवा१ । मा३हाइ ॥ सावा ॥ जाइपुप्रना२३४वा ।
वा५इपो६हाइ ॥

(स्व० ५ । प० १२ । वि० ९) २०(फो । ७१७)

॥ आभीशवे द्वे । द्वयोरभीशुः पंक्तिरिन्द्रः ॥

(४११।३)
इन्द्रोमदा५यवावृधाइ ॥ शवसेवृ । त्रहा२नृभिः । आऔ३हो । औहोवा२३४५ ।
हि२३४५ । तमिन्मह । त्सुवा२जिषु । आऔ३हो । औहोवा२३४५ ।
हि२३४५ । ऊतिमर्भे । हवा२मह । आऔ३हो । औहोवा२३४५ । हि२३४५ ॥
सवाजेषुप्रा३नो३ ॥ वा३४५इपो६हाइ ॥

(स्व० ११ । प० १८ । वि० ७)२१ (गे । ७१८)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(४११।४)
इन्द्रोमदायवावृधेशवसेवृ ॥ त्रहान्नृ१भीर२ः । तामिन्महः । त्सूआ१जिपूर ।
ऊतीमा२३४भाइ । हवा२माहाइ ॥ सवाजेपूप्रा२नो३॥ वा३४५इपोदिहाइ ॥
(स्व० ७ । प० ८ । वि० ६)२२ (जू । ७१९)

॥ बार्हद्गिराणि त्रीणि । त्रयाणां बृहद्गिरिः पंक्तिरिन्द्रः ॥

(४११।५)
इन्द्रो३१२३४ । मदा ॥ यवावृधेशवा२सा२३४इवृ । त्रहा३ । औहो३वा ।
आ३ । औहो२३४वा । नृभाइः । तमिन्महत्स्वाजिपूतिमा२३भाइ ।
हवा३ । औहो३वा । आ३ । औहो२३४वा । महाइ ॥ सवाजेषुप्रना३ ।
औहो३वा । आ३ । औहो२३४वा ॥ वा५इपोदिहाइ ॥
(स्व० ९ । प० १३ । वि० ७) २३ (धे । ७२०)

(४११।६)
इन्द्रो३४ । मदाय । वावा२द्धाइ ॥ शवसेवृ । त्रहान्नृभी३ः । हाउहौ ।
होवा । तामिन्महः । त्सूआ१जिपूर । हाउहौ । होवा । ऊतिमर्भे ।
हवामाहे३ । हाउहौ । होवा ॥ सवाजेपूप्रा२नो३ ॥ वा३४५इपोदिहाइ ॥
(स्व० १५ । प० १७ । वि० ८)२४ (क्रे । ७२१)

(४११।७)
ओहाइ । इन्द्रो३४ । मदाय । वावा२द्धाइ ॥ शवसेवृ । त्रहान्नृभी३ः ।
आउहौ । होवा । तामिन्महः । त्सूआ१जिपू३ । आउहौ । होवा । ऊतिमभाई । हवौं ।
हो३वा । माहा२इ ॥ सवाजेषुप्रा३नो ॥ विवात् । औ२३होवा । हो५इ ॥ डा ॥
(स्व० १५ । प० २१ । वि० १०)२५ (पो । ७२२)

॥ स्वाराज्यम् । इन्द्रः पंक्तिरिन्द्रः ॥

(४१२।१)
इन्द्रतुभ्यमिदद्रिवा५ए ॥ आनुत्तंवज्रिन्वीरियम् ॥ यद्धत्या१म्मार ।
याइनंगृणम् । तवात्या१न्मार । यायावधीः ॥ अर्चाना१नूर ॥ स्वाराजियम् ।
इडा२३भा२४३ । ओ२३४५इ ॥ डा ॥　　(स्व० ४ । प० ११ । वि० ७)२६ (ते । ७२३)

॥ संवेशीयम्, भृण्णुसाम । कश्यपः पंक्तिरिन्द्रः ॥

(४१३।१)
माइहीर । अभीहिधृष्णुहाऔ३हो ॥ नाता२इ । वज्रोनिय२सताऔ३हो ।
आइन्द्रार । नृम्ण२हितेशवाऔ३हो ॥ हाना२ः । वृत्रंजयाअपाऔ३हो ॥
आर्चा२नानूर । स्वाराजियम् । इडा२३भा२४३ । ओ२३४५इ ॥ डा ॥
(स्व० ५ । प० १३ । वि० ११)२७ (व । ७२४)

Digitized by Madhuban Trust, Delhi

॥ संवशीयम् । मरुतः पंक्तिरिन्द्रः ॥

(४१४।१)

यदुदीरा९तआजयाः॥ धृष्णवेरधी । यताइधा१नारम् । युंक्ष्वामदच्युता३ ।
हारी । क९हनःकंवसा३उ । दाधाः॥ अस्मा९आ२३इन्द्रा ॥ वसौदा२३धा३४३ः ।
ओ२३४५इ ॥ डा ॥ (स्व० ७ । प० ११ । वि० १०)२८ (चौ । ७२५)

॥ यामे द्वे । यमः पंक्तिरिन्द्रः, चित्रा वा । (पितरो वा पूर्वस्य) ॥

(४१५।१)

अक्षन्नमीमद । तही३ । आ२३४ । वप्रियाअधू । षता ॥ अस्तोषतस्वभानवः ।
विप्रानार३वी । ष्ठायामती॥ योजानू३वा३इ॥ द्रा२ता२३४औहोवा ॥
हा२३४री ॥ (स्व० ११ । प० ११ । वि० ४)२९ (की । ७२६)

॥ यामम् । यमः पंक्तिरिन्द्रः ॥

(४१६।१)

उपोषुश्रृणुहीगिरः । ए३ । औ३हो५वा ॥ माघवन्मा । तथाआ१इवा२३४ ।
कदा३४नस्सू । नार्त्तावतः । करइद । थाया१साइ२३४त् ॥
योजा३४नुवा३इ॥ द्रा२ता२३४औहोवा ॥ हा२३४री ॥
(स्व० ७ । प० १२ । वि० ९)३०(छो । ७२७)

॥ त्रैतानि त्रीणि । त्रयाणां त्रितः पंक्तिरिन्द्रो विश्वेदेवाः ॥

(४१७।१)

चन्द्रमाआउवा । प्सुवान्ताराउवा । सुपर्णाधाउवा॥ वतादिवि । नवोहिराउवा ।
ण्यनाइमायाउवा । पदंविन्दाउवा । तिविद्युताः॥ वित्तम्माआउवा ।
स्यरोदा२३सा३४३इ । ओ२३४५इ ॥ डा ॥ (स्व० ५ । प० १२ । वि० १३)३१(फि । ७२८)

(४१७।२)

चन्द्रमाआ॥ प्सू३आन्ता३रा । सूपर्णाधाव । ता२३इ । दिविया ।
नवो२हिरण्यनेमयःपदंविन्दे । तिविद्युतो२३४हाइ॥ वित्त९होइ । मआ२३हो ॥
स्यरोदा२३सा३४३इ । ओ२३४५इ ॥ डा ॥ (स्व० ६ । प० १२ । वि० ८) ३२ (खे । ७२९)

(४१७।३)

चन्द्रमा३आप्सुवन्तरा ॥ सूपर्णाधा । वताइदा१इवी२ ।
नवो२हिरण्यनेमयःपदंविन्दे । तिविद्युता२३ः॥ वित्त९होइ । मआ२३हो ॥
स्यरादा२३सा३४३इ । ओ२३४५इ ॥ डा ॥ (स्व० ५ । प० १० । वि० ८)३३ (मै । ७३०)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(४१७।४)

चन्द्रमाअ…

हिरण्यनम…

स्यारो२३…

…तिः॥

…४ (चेल । ७३१)

(४१७।५)

चन्द्राहोम…

हुवा२३४…

हुवा२३४…

वित्तम्मेअ…

…॥

…) ३५ (म्लू । ७३२)

(४१८।१)

म्रा२३४…

स्तोताव…

पातिम्रा…

…८)३६(धे । ७३३)

(४१९।१…

आ२३…

यद्वास्य…

द्यविया…

…१० ७)१ (धे । ७३४)

(४१९।२…

आतअ… इ५ऽस्तोतृभ्या३आ ॥

समिद्दीदयताइ । हुम्३हुम् । द्या२३४वा ॥

(स्व० १० । प० १० । वि० १२)२ (मा । ७३५)

हुम्हु३४म् । भा३४५रोदेहाइ ॥

॥ ओ३म् ॥
अग्निष्टोम महासोमयाग
दिनांक 2 से 7 अप्रैल, 2007
50/-
पचास रुपये
विद्ययामृतमश्नुते
हम दानकर्ता को उसके अमूल्य सहयोग के लिए हार्दिक आभार प्रकट करते हैं
क्रम संख्या 4779
आयोजक :
श्रुति विज्ञान आचार्यकुलम्
वृद्ध आश्रम, ग्राम छपरा, शाहाबाद मारकण्डा, कुरुक्षेत्र, हरियाणा-136135
दूरभाष : 9416488262
कार्यक्रम स्थल :
श्रुति विज्ञान आचार्यकुलम्
वृद्ध आश्रम, ग्राम छपरा, शाहाबाद मारकण्डा, कुरुक्षेत्र, हरियाणा

॥ संवर्गीयम् । मरु

(४१४।१)

यदुदीरा॰त ...

हारी । क ... ३ः ।

ओ२३४॰इ ... २८ (चौ । ७२५)

(४१५।१)

अक्षन्नमीमद ...

विप्राना२३व ...

ह्वा२३४री । ... (की । ७२६)

(४१६।१)

उपोषुश्रृणुही ...

कदा३४नस्स ...

याजा३४नुय ... ०(छो । ७२७)

(४१७।१)

चन्द्रमाआउ ...

ण्यनाइमाया ...

स्यरोदा२३स ... १(फि । ७२८)

(४१७।२)

चन्द्रमाआ॥ ...

नवो२हिरण्यने ...

स्यरोदा२३सा ... (खै । ७२९)

(४१७।३)

चन्द्रमा३आप्सु ...

नवो२हिरण्यनेमयःपदावन्द । ।तावद्यूता२३ः॥ वित्त॰हाइ । मआ२३हो ॥

स्यरोदा२३सा३४३इ । ओ२३४॰इ ॥ डा ॥ (स्व० ५ । प० १० । वि० ८)३३ (मै । ७३०)

Digitized by Madhuban Trust, Delhi

(४६७४) ॥ सौपर्णे द्वे । द्वयोः सुपर्णः पंक्तिरिन्द्रो विश्वेदेवाः ॥

चन्द्रमाअप्सुवा ॥ तरा । सुपर्णोधावतदार३इवी । नवार२होइ ।
हिरण्यनमयःपदंविन्द । तिविद्युतार३ः ॥ वित्त२होइ । मआर२हो ॥
स्यरोर३ । दारसार२३४औहोवा ॥ ऊ२२३४पा ॥

(स्व० ७ । प० ११ । वि० ७)३४ (चले । ७३१)

(४६७५)

चन्द्राहोमाअप्सुवन्तरा । औदेवा ॥ सुपर्णोधावतदाइवाये३ । होवा३हो२इ ।
हुवा२३४५इ । नवाहाइरण्यनाइमाया२३ः । होवा३हो२इ ।
हुवा२३४५इ ॥ पदंविन्दन्तिवाइद्यूतार३ः । होवा३हो२इ । हुवा२३४५इ ॥
वित्तम्मेअस्यरोदासाये३ । होवा३हो२इ । हुवा३औ५वा६५६ ॥ ऊ२२३४पा ॥

(स्व० १० । प० १५ । वि० १६) ३५ (म्लू । ७३२)

(४६८१) ॥ लौशम् । लुशः पंक्तिरश्विनौ ॥

प्रा२३४ । तिप्रियतमम् । राथाम् ॥ वार्षणंव । सुवाहा२२नाम् ।
स्तातावा३मा३ । श्विना२वा२३४र्पा३ः । स्तामाइर्भा२र्भू३ ।
पातिप्रा२३४र्ता ॥ माध्वाइमा३मा३ ॥ अ२३ता३म् । हा३४५वोदेहाइ ॥

(स्व० ४ । प० १२ । वि० ८)३६ (धै । ७३३)

एकविंशति चतुर्दं, सप्तमः खण्डः ॥ ७ ॥ दशतिः ॥ ४ ॥

॥ इति ग्रामे गेय-गाने एकादशस्यार्द्धः प्रपाठकः ॥

॥ संजये द्वे । द्वयोरिन्द्रः पंक्तिरग्निः ॥

(४६९१)

आ२३४ । तेअग्नइधी । माहाइ ॥ द्युमन्तंदेव३ । आ२३ । जरमा ।
यद्धास्या३ता३इ । पानी२या२३४सी । समिद्दी२दय । ता२३इ ।
इविया ॥ इषा५स्तो३तृ३ ॥ भ्या२३आ३ । भा३४५रोदेहाइ ॥

(स्व० ४ । प० १४ । वि० ७)१ (धे । ७३४)

(४६९२)

आतेअग्नइधी । मा३हाइ । द्युमन्ता३०देवअजरम् ॥ यद्धस्यातपनीयसी ।
समिद्दीदयताइ । हुम्३हुम् । धा२३४वा ॥ इष५स्तोतृभ्या३आ ॥

(स्व० १० । प० १० । वि० १२)२ (मा । ७३५)

हु३म्हु३४३म् । भा३४५रोदेहाइ ॥

Digitized by Madhuban Trust, Delhi

(४२०।१) ॥ उत्सेधः, उत्सेधम् वा । अंगिरसः पंक्तिरग्निः ॥

हाउ । औहो२३४वा । अग्निन्नस्वव्रुक्तिभी२३४५ः॥ हाउ । औहो२३४वा ।
होतारन्त्वावृणीमहे२३४५। हाउ । औहो२३४वा । शीरंपावकशोचिषम् ।
विवोमा२३४दाइ॥ हाउ । औहो२३४वा । यज्ञाइपुस्तीर्णबर्हिषा२३४५म्॥
हाउ । औहो२३४वा॥ विवक्षसे ऽ२३४५ ॥ (स्व० ९ । प० १६ । वि० १०)३ (तौ । ७३६)

(४२०।२) ॥ निषेधः, निषेधम् वा । अंगिरसः पंक्तिरग्निः ॥

अग्निन्नस्वव्रुक्तिभिर्हइहाहाइ॥ होतारन्त्वावृणीमहइहा३ । हाइ ।
शीरंपावकशोचिषमिहइहा२ । हाइ । विवोमा२३४दाइ ॥
यज्ञाइपुस्तीर्णबर्हिषमिहइहा२॥ हा३इ॥ वा२इवा२३४औहोवा ॥ क्षा२३४से ॥

(स्व० १२ । प० १० । वि० १३)४ (त्रि । ७३७)

(४२१।१) ॥ सत्यश्रवसः वाय्यस्य साम । सामसत्यश्रवाः पंक्तिरुषा ॥

महा३४इ । महेनोअद्य । बोधा६या॥ उषोरायें । दिवितमा२३ती ।
यथाचीन्ना२ः । आबोधा२३४याः । सत्याश्रा२वा३ ।
सिवा२या२३४याइ॥ सुजाता३आ२ । श्वा२३४वू३ । ना३४५र्तो६हाइ ॥

(स्व० ६ । प० १२ । वि० ७)५ (खे । ७३८)

(४२२।१) ॥ पौषम् । पूषा पंक्तिः सोमः ॥

भद्रन्नो२३अपिवातया॥ मनो२द । क्षाम् । ऊतक्रा२३४तूम् ॥ आधाते
सा । ख्यअन्धसा२ः। विवोमा२३४दाइ । रणा२गावा२नय ॥
वसायि३॥ वा२इवा२३४औहोवा ॥ क्षा२३४से ॥ (स्व० १० । प० १२ । वि० ८)६ (क । ७३९)

(४२३।१) ॥ औषसम् । उषा पंक्तिरिन्द्रः ॥

ऋतावामहा२अनुष्वधा६मे॥ भीमआवावृ३ताइशा१वा२ः । श्रियकर्णवा३ः ।
ऊपाका२३४योः । निशिप्रीहरि३वान्दा१धा२इ॥ हस्तायो३वा३ ॥
वज्रमा२३४वा । या६सो६हाइ ॥

(स्व० ३ । प० ८ । वि० ९)७ (गो । ७४०)

(४२४।१) ॥ लौशम् । लुशः पंक्तिरिन्द्रः ॥

सघातंवृषणम् । रथा२४औहोवा॥ आधितिष्ठा । तिगोवा१इदा२म् ॥
यपात्र२हा । रियारजा२३४नाम् । पूर्णामि । द्रा । चीकेता२३४ती ॥
योजानू३वा२इ॥ द्रा२ता२३४औहोवा ॥ हा२३४री ॥

(स्व० ९ । प० १२ । वि० ७)८ (धे । ७४१)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(४२५।१)　　॥ निषेधस्साम । आंगिरस: पंक्तिरग्नि: ॥

अभिता३०मन्ययेयावस्व:॥ अस्तंयंया३ । तीधना२३४रा: । अस्तमर्वा३ ।
ताआ२शा२३४वा: । अस्तान्नित्या३ । सावा२जा२३४इना:॥
इषा२स्तो३तृ२४ । हाहो२३४हा॥ भ्या२३आ३ । भा३४५रो६हाइ ॥

(स्व० ४ । प० ११ । वि० ८)९ (तै । ७४२)

(४२६।१)　　अꣳहोमुचस्साम, गौराङ्गिरसस्य साम वा । अꣳहोमुग्बृहती विश्वेदेवा: ॥

नतमꣳहोनदुरितम् । ईयइयाहाइ॥ दाइवा२सोअष्टमार्तियमी । यइया२३हाइ ।
सजोषसायमर्यमाइ । यइया२३हाइ॥ माइत्रोनाया३॥ तिवा२रू२३४५णा६५६:॥
अतिद्विषा२३४५: ॥

(स्व० ८ । प० ९ । वि० १३) १०(दि । ७४३)

दश षष्ठम:, अष्टम: खण्ड: ॥ ८ ॥ दशति: ॥ ४ ॥

॥ इति पंक्ति: ॥

(४२७।१)　　॥ इन्द्रस्य संक्रमे द्वे । द्वयोरिन्द्र: पंक्तिरिन्द्रसोमौ ॥

परिप्रधन्वा॥ इन्द्रायसोमास्वा१दू२३४: । हाइ । मित्राया॥
पूष्णभा२३४हाइ॥ गा२३४यो६हाइ ।

(स्व० ५ । प० ६ । वि० ४)११ (पी । ७४४)

(४२७।२)

परिप्रधन्वा॥ इन्द्रायसोमा । ओऽहा । ओ३हा॥ स्वादुर्मित्राया ।
ओ३हा । ओ३हा॥ पूष्णा२४ओहोवा॥ भगा२या२३४५ ॥

(स्व० ७ । प० ९ । वि० १)१२ (झ । ७४५)

(४२७।३)　　॥ सौहविषाणि त्रीणि (स्वर्निधनꣳ सौहविषम्) । त्रयाणां सुहवि: पंक्तिरिन्द्रसोमौ ॥

परी३होइ । प्रधा२३४न्वा॥ इन्द्रा३हो । यसो२३४मा ।
स्वादू३होइ । मित्रा२३४या । पूष्ण३होइ । भगा२३४या॥ पूष्णभगाय॥
पूष्णे३४३ । हो३४३इ । भा३गा५या६५६ ॥ ए३ । सुवर्ज्योती२३४५ ॥

(स्व० ६ । प० १४ । वि० ४)१३ (धौ । ७४६)

(४२७।४)

हा३हाइ॥ परिप्र३धान्वा । ए२३४हिया । हा३हाइ॥ हा३हाइ ।
इन्द्राय३सोमा । ए२३४हिया । हा३हाइ॥ हा३हाइ । स्वादुर्मि३त्राया ।
ए२३४हिया । हा३हाइ ॥ हा३हाइ । पूष्णभ३गाया । ए२३४हिया ।
हा३हा३४३५इ । ओ२३४५इ ॥ डा ॥

(स्व० ४ । प० १८ । वि० ९)१४(दो । ७४७)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(४२७।५)　　॥ वाङ्निधनं साहविषम् ॥

प । येपारी ॥ प्रधन्वा । होवा३होइ । इन्द्रायसोमा । होवा३होइ ।
स्वादुर्मित्राया । होवा३होये३ ॥ पूष्णौवाओ२३४वा ॥ भगा५याउ ॥ वा ॥

(स्व० ५ । प० ११ । वि० ४)१५ (पी । ७४८)

(४२८।१)　　॥ वाकानि त्रीणि । त्रयाणां वको ऽनुष्टुप् सोमः ॥

ऊपुप्रधन्वावाज३सा ॥ तायाइ । ओइ । पारी । ओइ । वृत्राणि ।
सक्षणिः ॥ द्वाइस्तारा२ ॥ धियार३ । अर्णायार: । नार: ।
इरासा२३इ । ओये३ । रसा३४३इ । ओ२३४५इ ॥ डा ॥

(४२८।२)　　(स्व० ५ । प० १६ । वि० ११)१६ (प । ७४९)

पर्यूषू ॥ प्रधन्वावा३ । जासाता२३५याइ । परिवृत्राणिसक्षणिः ।
द्विषास्ता३रा ॥ धियाकृणया१ना३ई ॥ हुम् । रा३४५सो६हाइ ॥

(४२८।३)　　(स्व० ४ । प० ८ । वि० ६)१७ (दू । ७५०)

प । येपारी ॥ ऊपुप्रधन्वावाजसातयेपरिवृत्राणिसक्षणिर्द्वा२३इषाः ।
ता२३रा ॥ धियाकृणयानओवा३ओ२३४वा ॥ रा५सो६हाइ ॥

(स्व० ८ । प० ३ । वि० ६)१८ (द्रू । ७५१)

(४२९।१)　　॥ धर्म धाम सामनी वा द्वे । द्वयोः प्रजापतिः पंक्तिस्सोमः ॥

पवस्वसोमा ॥ माहान्तसमुद्राः । पितादे३वाना२३म् ॥ वा२३श्वा२३४औहोवा ॥
भिधामा२३४५ ॥

(स्व० ८ । प० ५ । वि० ४)१९ (णी । ७५२)

(४२९।२)

औहो६वा । औहो३वा । औहो३वा२३४औहो६वा । पवस्वसोम ।
महान्तसमुद्रः ॥ पितादे३वाना३म् ॥ विश्वाभिधामा२३४ । औहो६वा ।
औहो३वा । औहो३वा२३४औहो६वा ॥ ए३ । धर्मा२३४५ ॥

(स्व० १६ । प० १२ । वि० ४)२० (खी । ७५३)

(४३०।१)　　॥ विधर्म सामनी द्वे । द्वयोः प्रजापतिःपंक्तिस्सोमः ॥

औहो६वा । औहो३वा । औहो३वा२३४औहो६वा । पवस्वसोम ॥
महेदक्षाय ॥ अश्वोननिक्तः ॥ वा३जीधनार्या२३४ । औहो६वा ॥
औहो३वा । औहो३वा२३४औहो६वा ॥ ए३ । विधर्मा२३४५ ॥

(स्व० १५ । प० १२ । वि० ३)२१ (फि । ७५४)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(४३०।२) ॥ धनसाम ॥

पवस्वसोमा॥ महेद२क्षायार॥ अश्वोननिक्तो२३॥ वाजा३४।
औहोवा। धना३या२३४५॥ (स्व० ६। प० ६। वि० नास्ति)२२ (ह्र। ७५५)

(४३१।१) ॥ भागम्। भगः पंक्तिस्सोमः ॥

इन्दुःपविष्टाः। चा२३रूः॥ मदाया॥ अपामुपा२३स्था२इ॥
का२वा२३४औहोवा॥ भगा२या२३४५॥ (स्व० ८। प० ६। वि० ३)२३(ति। ७५६)

(४३२।१) ॥ वाजिनाम् साम। वाजिनोऽनुष्टुप्सोमः ॥

अनु। अनू॥ हाइत्वासुत५सोममदामसि। मदामसा२इ। महा३४३इ।
सा३४मा॥ येराज्ये। वाजा५अभिपवमान। पवमाना॥ प्रागाहसा।
औ३होवा। हो५इ॥ डा॥ (स्व० ११। प० १३। वि० ४)२४(गो। ७५७)

(४३३।१) ॥ हिंकम्। प्रजापतिः पंक्तिर्मरुतः ॥

कईन्य५क्ताः॥ नरस्स३नाइडा२ः॥ रुद्रस्यमर्या२३ः॥ आ२था२३४औहोवा॥
सुव३श्वा२३४५ः॥ (स्व० ३। प० ५। वि० ७)२५(जे। ७५८)

(४३३।२) ॥ विकम्। प्रजापतिः पंक्तिर्मरुतः ॥

कई३४३०वियक्ताः॥ नरा२४३स्सनीडाः॥ रुद्रस्यामर्या२३ः॥
आ२था२३४औहोवा॥ सुव३श्वा२३४५ः॥ (स्व० ५। प० ५। वि० ६)२६(मू। ७५९)

(४३३।३) ॥ निकम्। प्रजापतिः पंक्तिर्मरुतः ॥

काई२। विया२३। ओवा३। आक्ताः॥ नाराः। सना२३। ओवा३।
आइडाः॥ रूद्रा। स्यमा२३। ओवा३। आर्याः॥ आथा। सुवा२३।
ओवा३। आश्वाः। हो५इ॥ डा॥
(स्व० नास्ति। प० १८। वि० ९)२७(रो। ७६०)

(४३४।१) ॥ आश्वे द्वे। द्वयोरश्वः पंक्तिराशिः ॥

अग्नेतमाद्या॥ अश्वन्नस्तोमाइः। क्रतुंन्न३भाद्रा२म्॥ हार्दिस्पृशाम्॥
ऋध्या२मा२३४औहोवा॥ तआहा२३४५इः॥ (स्व० ५। प० ६। वि० ८)२८(पे। ७६१)

(४३४।२)

अग्ने। हो३४३इ। तमद्य॥ अश्वन्नस्तोमाइः। क्रतुन्न३भाद्रा२म्॥
हार्दा२ओइ॥ स्पृशम्। ऋध्या२मा२३४औहोवा॥ तओहा२३४५इः॥
(स्व० ५। प० १। वि० ११)२९(भ। ७६२)

CC-0. Shri Vipin Kum...

॥ वाजिनांसाम । वाजिनोष्णिक् सविता ॥

(४३५।१)
आविर्मा२३४र्याः ॥ आवाजंवाजिनोअग्मान् । देवस्यस ॥ वितुस्सा२३४वाम् ॥
स्वर्गा२अर्वा२३४५न्ताऽ६५६: ॥ जयता२३४५ ॥ (स्व० ६ । प० ६ । वि० ६) ३० (कृ । ७६३)

॥ पवित्रम् । आदित्याः पंक्तिस्सोमः ॥

(४३६।१)
पवस्वसोमा ॥ द्युम्नी३४३सुधारः । माहा२अवीनाम् ॥ अनुपू ॥ वियो३४५इ ॥
(स्व० ५ । प० ६ । वि० ४) ३१ (पी । ७६४)

॥ एकविंशति [illegible], नवमः खण्डः ॥ ९ ॥ दशतिः ॥ ५ ॥

॥ आभरे द्वे । द्वयोरिन्द्रः पंक्तिरिन्द्रः ॥

(४३७।१)
विश्वतोहाउ ॥ दावान्विश्वतोनाः । ओ३ । हा । ओ२३४हाइ । आ ।
भरा । भा२३रा ॥ यान्त्वाशविष्ठमाइ ॥ माहा । ओहो२३४वा ॥ एहीयिही१ ॥
(स्व० ९ । प० १२ । वि० ४) ३२ (र्धा । ७६५)

(४३७।२)
विश्वतादावन्विश्वतोनआ ॥ भरा । भा२३रा ॥ यान्त्वाशविष्ठमाइम ॥
हा । ओ३होवा । हो५इ ॥ डा ॥ (स्व० ५ । प० ८ । वि० ३) ३३ (वि । ७६६)

॥ वासुमन्दे द्वे । द्वयोर्वसुमन्दो गायत्रीन्द्रः ॥

(४३८।१)
एषाः ॥ ब्राह्मायआ३१उवा२३ । ए३ । त्वियआ ॥ आ२३इन्द्राः ॥
नामश्रुता३१उवा२३ ॥ ए३ । गृणआ ॥ (स्व० १ । प० ८ । वि० ८) ३४ (गै । ७६७)

(४३८।२)
एषाएषाः ॥ ब्राह्मा२ब्राह्मा२ । यऋत्वियोवा । ओवा ॥ आइन्द्रा२आइन्द्रा२: ॥
नामश्रुतोवा । ओवा । गृणा । ओ३होवा । हो५इ ॥ डा ॥
(स्व० १ । प० ११ । वि० ८) ३५ (कै । ७६८)

॥ कावपानि त्रीणि । त्रयाणां कवपो गायत्रीन्द्रः ॥

(४३८।३)
एषाः । ओ । ओवा ॥ ब्रह्मायाः । ऋत्वियाः२: । आइन्द्रो३हा३इ ॥
नो३मा ॥ श्रू२३तो । गृणा । ओ३होवा । हो५इ ॥ डा ॥
(स्व० १ । प० १२ । वि० ६) ३६ (खू । ७६९)

Digitized by Madhuban Trust, Delhi
CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(४३८।४)

औ३हा३४३ । ओ३४हा । एषब्रह्मा३४३ या३४ः ।

ऋत्वियाः ॥ औ३हा३४३ । ओ३४हा । इन्द्रोनामा३४३ । श्रु३४ ।

तोगृणाइ ॥ औ३हा३४३ । ओ३४५हा६५६ ॥ ए३ । सुवर्ज्योती३४५ ॥

(स्व० २ । १० १४ । वि० ३)३७ (झि । ७७०)

(४३८।५)

एषब्रह्माँहो ॥ याऋत्वियाः ॥ इन्द्रोनामँहो ॥ श्रुतोगृणा३१उवा२३ ॥

ऊ३४पा ॥

(स्व० ८ । १० ५ । वि० ३) ३८ (गिव । ७७१)

॥ इति ग्रामे गेय-गाने ~~एकादशः~~ प्रपाठकः ॥ ११ ॥

॥ श्लोके द्वे । द्वयोः प्रजापतिस्त्रिष्टुबिन्द्रः ॥

(४३९।१)

हाउस्वरता ॥ ब्रह्माणारः । इन्द्रम् । आ । महया२०तो२३४ । कैः ॥

अवार्द्धयान् । अहयेहे । तवा३४५३ । ऊ६५६ ॥ श्लोकयता२३४५ ॥

(स्व० ३ । १० ११ । वि० ६)१ (द्रु । ७७२)

(४३९।२)

हाउ । अभि । स्वरता ॥ ब्रह्माणआइन्द्रारम् । महया२०तो२३४ । कैः ।

अवर्द्धयारन् ॥ अहयेहन्तवा२३४५ऊ६५६ ॥ श्लो२३४काः ॥

(स्व० ३ । १० ९ । वि० ८)२ (हे । ७७३)

॥ अनुश्लोके द्वे । द्वयोः प्रजापतिस्त्रिष्टुबिन्द्रः त्वष्टा वा ॥

(४४०।१)

हाउस्वरता । स्वरतस्वरा२३ता । आनवस्ऽरथम । श्वायाता१क्षू२३४ः ॥

हाउस्वरता । स्वरतस्वरा२३ता । त्वष्टावज्रंपुरुहू । तान्द्युमान्ता२३४म् ॥

हाउस्वरता ॥ स्वरतस्व । रारे । ता२३४ । औहोवा ॥ स्वरा३ता२३४५ ॥

(स्व० ९ । १० १४ । वि० ५)३ (धु । ७७४)

(४४१।१)

औहोइ । शम्पदाम् ॥ मघंरया३१२३४३ । पिशाइ । नकाममव्रतोहिनोतिनस्पृशत् ॥

रयिमा२३४५इ ॥ डा ॥

(स्व० ६ । १० ७ । वि० ६)४ (धृ । ७७५)

❀

॥ वाचः सामनी द्वे । द्वयोर्वाग्पङ्क्तिर्वाक् ॥

(४४२।१)

सादा ॥ गावश्शुचयोविश्वधायार२३साः ॥ सार३४दा ॥ दाइवाअरो२३४वा ॥

पार३४साः ॥ (स्व० ४ । प० ५ । वि० ४) ५ (नीं । ७७६)

(४४३।१)

औहोऽ३इ । आयाही ॥ वनार२सासहा । गावःसच । तावर्त्तानीरम् ॥

यात् । ऊ२३ ॥ धभिरो२३४५इ ॥ डा ॥ (स्व० २ । प० ९ । वि० ४) ६ (झी । ७७७)

॥ माधुच्छन्दसम् । मधुच्छन्दा त्रिष्टुभ्मरुतः ॥

(४४४।१)

औवा । उपप्रक्षमधुमतिक्षियन्तः । औवा ॥ औइ । पुष्येमरयिन्धीमहेतआ२३इन्द्रा ॥

औ । वाओवा ॥ औ । वाहा३१उवा२३ ॥ ऊ३४पा ॥

(स्व० ५ । प० १० । वि० ६) ७ (स्यू । ७७८)

॥ मारुतम् । मरुतस्त्रिष्टुभ्मरुतः ॥

(४४५।१)

अर्चन्तियो ॥ कम्मरुतःसुवा२३र्काः ॥ आस्तोभताइ ॥ श्रुतोयुवासआइन्द्रा२३उवा३ ॥

ऊ३४पा ॥ (स्व० ३ । प० ५ । वि० ५) ८ (ण्यु । ७७९)

॥ उद्वांशं साम । उद्वंशपुत्रःप्रजापतिस्त्रिष्टुबिन्द्रो वृत्रहा ॥

(४४६।१)

प्रवाः ॥ आइन्द्रायवृत्रहान्तमा२३या ॥ वाइप्रायगाथंगा१या३ता ॥

यंजुजोषा२ । उप् । पा२तो३५हाइ ॥ (स्व० ३ । प० ६ । वि० ५) ९ (ड्रु । ७८०)

षोडश खण्डः, दशमः खण्डः ॥ १० ॥ दशतिः ॥ ७ ॥

॥ इति प्रथमोऽर्धः प्रपाठकः ॥

॥ शार्म्ये द्वे । द्वयोर्धुरो गायत्र्यग्निः ॥

(४४७।१)

अर्चतीः ॥ अग्निः । चिकाइ२३इतीर३ः ॥ हा२३व्या३ । वा२हना२३४औहोवा ॥

सुमद्रथा२३४५ः ॥ (स्व० ३ । प० ६ । वि० ५) १० (डु । ७८१)

Digitized by Madhuban Trust, Delhi

(४४७।२)

अग्ने तिया॥ आइश्वाइश्वाइती२३: । हौहोइ । औ३हो२३४५॥ हव्या२३ ॥

वा२इना२३४औहोवा॥ ए३ । सुमद्रथा२३४५: ॥ (स्व० ४ । प० ८ । वि० ७)११ (दे । ७८२)

(४४८।१) ॥ गृहदः (गृदम्) । प्रजापतिः पंक्तिरग्निः ॥

ओग्नाइ॥ त्वन्नो२३आ । हुम्मा२३ । ता२३४माः । उतत्राताशिवोभुवः ॥

शिवोभुवा२३:॥ वरोवा । था५यो६हाइ ॥ (स्व० ४ । प० ८ । वि० ६)१२ (दृ । ७८३)

(४४८।२) ॥ अत्यहः । विश्वामित्रः पंक्तिरग्निः ॥

अग्नौ । होइ । त्वौ । होइ॥ नोअन्तमा३१उवा२३॥ ऊ२३४ता ॥

त्राताओ२३४वा॥ शिवोभुवा२३४५: ॥ (स्व० ५ । प० ८ । वि० ६)१३ (वृ । ७८४)

(४४८।३) ॥ गृहदः । प्रजापतिः पंक्तिरग्निः ॥

अग्नेतू३वन्नोअन्तमाः॥ उतत्राताशिवोभुवः॥ वरा२३॥ औहोहो२३४वा ।

था५यो६हाइ ॥ (स्व० ६ । प० ५ । वि० ४) १४(ह्री । ७८५)

(४४८।४) ॥ अत्यहः । विश्वामित्रः पंक्तिरग्निः ॥

अग्ने । हो३इ । त्वन्नोअ । तमाः॥ उता२ । हा२इ । औ३हो३१इ ॥

त्राता२। शिवो३४५॥ भू२३४वाः ॥ (स्व० २ । प० १० । वि० ६)१५ (त्रू । ७८६)

(४४९।१) ॥ सान्तनिके द्वे । द्वयोः प्रजापतिर्गायत्र्यग्निः ॥

भागाः॥ नचित्रः॥ अग्निमेहो२३ना३म्॥ दा२धा२३४औहोवा ॥

तिरत्ना२३४५म् ॥ (स्व० २ । प० ५ । वि० ५) १६ (त्रु । ७८७)

(४४९।२)

भगोनचित्राः॥ अग्निमेहो२३ना३म्॥ दा२धा२३४औहोवा ॥

ए३ । तिरत्ना२३४५म् ॥ (स्व० ३ । प० ५ । वि० ४)१७ (णी । ७८८)

(४५०।१) ॥ धनम् (द्वे । द्वयोः) प्रजापतिर्गायत्री विश्वेदेवाः ॥

विश्वस्या॥ प्रस्तोभा२ । पुरोवासा३न् । यदिवे२३४हा॥ नू२३॥

ना२मा२३४औहोवा॥ धा२३४नाम् ॥ (स्व० ४ । प० ७ । वि० ३)१८ (धि । ७८९)

CC-0. Shri Vipin K...

Digitized by Madhuban Trust, Delhi

(४५०।२) ॥ धर्मसाम ॥

औहोइविश्वस्या ॥ प्रस्तोभा२ । पुरौहो व३हाइ । वासार२न् । यदिवेहा ॥
नू२३ ॥ ना२मा२३४औहोवा ॥ धा२३४र्मा ॥ (स्व० ७ । १० ८ । वि० ४)१९ (जी । ७९०)

(४५१।१) ॥ उपसस्साम । उषा पंक्तिरुषा ॥

उषाअपा ॥ स्वासुष्टा२३४मः । संवार्त्तया । तिया२र्त्ता२३४नाम् ॥
सू२जा२३४औहोवा ॥ ए३ । तता२३४५ ॥ (स्व० ३ । १० ७ । वि० ४)२०(क्री । ७९१)

(४५२।१) ॥ भारद्वाजम् । भरद्वाजः पंक्तिर्विश्वेदेवाः ॥

इमानुकंभू२वना ॥ सीषधा२इमाउवा३ । ई३४हा । इन्द्रश्चवा२इश्चाउवा३ ।
ई३४हा ॥ चदे३ । वा२या२३४औहोवा ॥ वी२३४शाः ॥
(स्व० ४ । १० ८ । वि० ६)२१(द्रू । ७९२)

(४५३।१) ॥ रातिसाम । इन्द्रो गायत्रीन्द्रः ॥

विस्रूविस्रू ॥ ताया२स्ताया२ः । यथापथः ॥ आइन्द्रा२त्वाया२३ ॥
तुरो२३४वा । ता५योहाइ ॥ (स्व० १ । १० ६ । वि० ४)२२ (की । ७९३)

(४५४।१) ॥ भारद्वाजम् । भरद्वाजस्त्रिष्टुबिन्द्रः ॥

अयावाजाम् ॥ दाइवहि । त२सनेमा । मदेमश३ताहिमा२ः ॥ शता२३ ॥
हा२इमा२३४औहोवा ॥ सुवी२रा२३४५ः ॥ (स्व० ५ । १० ७ । वि० ६)२३(फ्रू । ७९४)

(४५५।१) ॥ देवम् । इरस्त्रिष्टुब्मित्रावरुणौ ॥

ऊर्जा ॥ मित्रावरुणःपिन्वता२३इडाः ॥ पीवरीमिषंकृणुहीन आइन्द्रा३उवाऽ३ ॥ ऊ३४पा ॥
(स्व० ४ । १० ४ । वि० ५)२४ (ध्यु । ७९५)

(४५६।१) ॥ वैराजे द्वे । द्वयोरिन्द्रो गायत्रीन्द्रः ॥

इन्द्रो३४ ॥ विश्वस्यरा ॥ जतिहो२३४५इ ॥ डा ॥ (स्व० १ । १० ४ । वि० १)२५ (घ्र । ७९६)

(४५६।२)

इन्द्रा२हो२३इ ॥ वा२इश्वा ॥ स्यरा२जति ॥ होवा२३हो२३४५इ ॥ डा ॥
(स्व० नास्ति । १० ५ । वि० ३) २६ (वि । ७९७)

॥ एकादशाध्यायः, एकादशः खण्डः ॥ ११ ॥ दशतिः ॥ ८ ॥

॥ इति ऐन्द्रपर्व समाप्तम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(४५७।१) ॥ वाजजित् । प्रजापतिरग्निर्विष्णुः ॥

औइन्द्रिक । द्विकाइ । घृ३महिषो । यवाशिरम् । तुविशुष्मः ॥ औइतृ२३४०पात् ।
सोमाम् । अपिबा३द्वि । ष्णुनासुतम् । यथावशम् ॥ औइसा२३४ईम् ।
ममा । दा३महिक । मकृतवे । महामुरुम् ॥ औइसा२३४इनाम् ।
सश्चात् । देवोदेवाम् । सत्यइन्दुःसत्या५मिन्द्राउ ॥ वा ॥

(स्व० ९ । प० २० । वि० २०)२७ (नौ । ७९८)

(४५८।१) ॥ गोरांगिरसस्य सामनी द्वे । द्वयोर्गौरतिजगतीन्द्रः ॥

अय५सहोहोहाइ ॥ समाना२३४वाः । दशाःकवीनांमतिर्ज्योः । तिविधा२३४र्मा ॥
ब्रध्नाःसमाइर्चीरुषसः । समाइरा१यार२त् । अरा३ । होवा३ ।
पा । सस्सच । तसा३ः ॥ स्वासरे ॥ मन्युमा२३०ताः ॥ चिता ।
या२३४औहोवा ॥ गो२३४५ः ॥

(स्व० ८ । प० १६ । वि० १०)२८ (टौ । ७९९)

(४५८।२)

अय५सहसमाना६वाः ॥ दशाः कवीनांमतिर्ज्यो । तिविधा२३र्मा ॥
ब्रध्नाःसमाइचीरुषसः । समाइरा१या२३त् । औ३वा । अरेपसःसचेतसः ।
स्वासरे ॥ मन्युमा२३ताः । औ३वा ॥ चिता३ः । गोरा२३४औहोवा ॥
वा२३४५ ॥

(स्व० १० । प० १३ । वि० ९)२९ (वो । ८००)

(४५९।१) ॥ प्रयस्वत् । प्रजापति (रग्नि) रत्यष्टिरिन्द्रः ॥

एन्द्रयाह्युपनाः ॥ पारा२वा२३४ताः । नायमच्छा । विदथानाइ ।
वासत्पा२३४तीः । अस्तारा२जे३ । वासत्पा२३४तीः ।
हवामहेत्वाप्रयस्वन्ताः । सुताइपू३वा ॥ पुत्रासोना । पितरंवा ।
जासाता२३४याइ ॥ म५हाइष्ठा२०वा२ ॥ जा२३सा३ ।
ता२३४५योदहाइ ॥

(स्व० ९ । प० १५ । वि० १०)३०(नौ । ८०१)

(४६०।१) ॥ अक्षय्यम् । रेवत्प्रजापतिरतिजगतीन्द्रः ॥

तमिन्द्रंजोहवीमिमघवानाम् ॥ ऊ२३४ग्राम् । सत्राहोइ । दधानमप्रता२इष्कु२३४ताम् ।
श्रवा२३स्या२इ । भू२३४री । म५हिष्ठांगीर्भिरा । चया२ज्ञा२३४याः ।
ववार्त्ता२ ॥ रायेहाइ ॥ नोविश्वासुपा२३४था । कृणो३ । तूरवा२३४औहोवा ॥
ऊ२३४पा ॥

(स्व० १४ । प० १४ । वि० ९)३१ (ध्वौ । ८०२)

Digitized by Madhuban Trust, Delhi

(४६१।१) ॥ यज्ञतुरम् । यज्ञतुरोऽत्यष्टिरिन्द्रः ॥

अस्तुश्रौषाट्॥ पुरोअग्निंधियादधे । हा । औ३हो२३४वा । आनुत्यच्छर्द्धोदि ।
व्याम् । वृणा२३हाइ । मा२३४हे । इन्द्रावा३यू३ । वृणी२मा२३४हाइ ।
यद्धकाणाविवा१स्वा३ताइ । नाभासन्दायना३ । व्यासाइ । अधप्रनूनमुपया ।
निधीतयारे३ः । हा । औ३हो२३४वा॥ दाइवा१२अच्छा२३ ।
हा । औ३हो२३४वा॥ नधो२३४वा । ता५योदिहाइ ॥

(स्व० ११ । प० २२ । वि० ११) ३२(ठ । ८०३)

(४६२।१) ॥ एवयामरुतः साम । एवयामरुदतिजगतीन्द्रः ॥

प्रो२३४ । वोमहेमतयोयन्तुविष्णवो । हाइ॥ मरुत्वता३इगिरिजा३४ः ।
हाहोइ । एवायार । मा२३४रुत् । प्राशर्द्धायार । प्रायज्यावा२३इ ।
सुखादा२३४याइ । तवसेभंदरिष्टये॥ धुनाइव्रा३ता३॥ यार३शा२३४औहोवा ॥
वा२३४से ॥ (स्व० ९ । प० १४ । वि० ९)३३(घो । ८०४)

(४६३।१) ॥ विषमाणि त्रीणि, (विषमाणानि वा)। भरद्वाजोऽत्यष्टिसोमः ॥

आया॥ रुचा । हरि । ण्यापुनानाः । विश्वाद्वेषा१२सितरती२३सा३युग्वभिः ॥
सूरो२३ना३॥ सा२यू२३४औहोवा॥ ग्वा२३४भीः ॥

(४६३।२) (स्व० ६ । प० ८ । वि० ४)३४ (गी । ८०५)

अयारुचाहरिण्या॥ पुनानः । विश्वाद्वा२३इषा । साइतर । त्यौहो । वा३हा३इ ।
सायूरग्वा२३४भीः॥ सूरो२३ना ॥ सयू३ग्वा५भाइ६ईः ॥

(स्व० ७ । प० ९ । वि० ७)३५ (झे । ८०६)

(४६३।३)

अयारुचाहरिण्या । पू२३४ । नानोविश्वाद्वेषा । साइतरति । सायुग्वाभीरः ।
सूरोना३ । सायूरग्वा२३४भीः । धाराष्पृष्ठा । स्यारो२चताइ ।
पुनानोआ३ । रूपोहा२३४रीः । विश्वाथद्रू । पापरिया । साक्रकाभीरः ।
सप्तासी३ये३॥ भा२३इरा३ । क्रा३४५भोइहाइ ॥

(स्व० १० । प० १० । वि० १०)३६ (कौ । ८०७)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(४६४।१)   ॥ सवितुस्साम । सवितात्यष्टिः सविता ॥

अभित्यन्देव२सवितारम् । औहोहोवाहाइ ॥ ओणा२३४यो: । कविक्रा२३४तूम् ।
आर्चामी२३४सा । त्यासावा२३४९रा । त्नधामा२३४भी ।
प्रियम्मा२३४तीम् । औहोऔहोवा२३४हाउ ॥ ऊर्ध्वाया२३४स्या ।
